'विस्तराधिगमो भवति' एकैकस्य तत उद्घटनादपकृष्टस्य विस्तरेण-लक्षणविधानाख्येन 'अधिगमः' परिच्छेदो भवति, एतदुक्तं भवति-यदा अधिगमः तदा न प्रमाणनयान्विरहय्य इति, प्रमाणसङ्ख्यानियमायाह-'तत्र प्रमाण'मित्यादि 'तत्रे'ति वाक्योपन्यासार्थः, प्रमीयतेऽनेन तत्त्वमिति प्रमाणं, करणार्थाभिधानः प्रमाणशब्द इति, आत्मा सुखादिगुणकलापोपेतो मत्यादिना साधकतमेनावबुध्यते विषयमित्यर्थः, आह-यदि तेन करणभूतेनावबुध्यते आत्मेति तर्ह्यनवबोधक्रियाप्रमाणत्वे एवमवबोधात्मकमेवेत्यनिष्टावाप्तिः, नैतदेवं, स्वपर्यायस्यैव करणत्वात्, तस्य कथञ्चित् ततोऽव्यतिरेकात्, अन्वयव्यतिरेकयोगेन चित्रस्वभावत्वात्, तेन करणभूतेनात्माऽवबुध्यत इत्युपपन्नं, तथाहि-भिन्नः ग्राह्यग्रहणस्वभावः क्रियायाः कथञ्चित् अभिन्न आत्मा तत्त्वतः प्रमाणं, तदत्र शाब्दं न्यायमधिकृत्योपसर्ज्जनीकृतक्रियावत्क्रियाभिधायी प्रमाणशब्दः, तदभेदाच्चात्मावबोध इति न कश्चिद्दोषः, एवं कर्तृसाधनादिपक्षेष्वपि प्रमिणोति-अवगच्छतीति प्रमाणमित्येवमादिष्वभिहितार्थानुसारतो भावना कार्या, मुख्यस्त्वयं प्रमाणशब्दः करणसाधन एवेति नात्र यत्नः, 'द्विविध'मित्यनेन सङ्ख्यानियममाह-द्विविधमेव, न त्रिविधादि, द्वैविध्यमेव दर्शयति-'परोक्षं प्रत्यक्षं च वक्ष्यत' इति, पराणि-द्रव्येन्द्रियाणि मनश्च तन्निमित्तं ज्ञानं परोक्षमित्यादि, धूमादग्निज्ञानवत्, प्रत्यक्षं पुनरश्नात्यश्नुते वाऽर्थानित्यक्षः-आत्मा तस्याक्षेन्द्रियमनांसि अनपेक्ष्य यत् स्वत एवोपजायते तत् प्रत्यक्षम्-अवध्यादि, चशब्दः स्वगतानेकभेद-समुच्चयार्थः, एतच्च वक्ष्यत उपरिष्टात् ''इत्थमुपन्यासे चैवमेवानयोर्भाव इति प्रयोजनं'' 'चतुर्विधमित्येके' इति चतुर्विधं प्रत्यक्षानुमानोपमानागम-भेदेन एके सूरयो मन्यन्ते, कथमित्याह-'नयवादान्तरेण' यतः केचिन्नैगमादयो नयाश्चतुर्विधमभ्युपयन्ति, अत एवानुयोगद्वारेषु चतुर्विध-मुपन्यस्तमिति, एतच्च यथा अवस्थितं चातुर्विध्यं तथा भाष्यकार

एवोत्तरत्र दर्शयिष्यति । एवं प्रमाणावयवं निर्भिद्य व्युत्पत्त्यादिद्वारेण नयावयवं विभजयन्नाह-'नयाश्चे'त्यादि, नयन्तीति नयाः, अनेकधर्मात्मकं वस्तु एकधर्मेण नित्यमेवेदमनित्यमेवेति वा निरूपयन्तीत्यर्थः, एते च पञ्च नैगमादयो वक्ष्यन्त उपरिष्टात्, अत एव सर्वनयावलम्बिनः प्रमाणं ज्ञानं, अमीषां भेदेनाभिधानं, तथाहि-प्रमाणं समस्तवस्तुस्वरूप-परिच्छेदात्मकं मत्यादीति, अतः प्रमाणं सम्यग्ज्ञानं, नयास्तु मिथ्याज्ञानं, यत आह-'एवं सव्वेवि नया मिच्छादिट्ठी'त्यादि, एवं च कृत्वा प्रमाणशब्दस्याभ्यर्हितत्वात् सूत्रे पूर्वनिपात इति न चोद्यावकाशः । अपरे वर्ण्णयन्ति-परस्परापेक्षया नैगमादयो नया इति व्यपदिश्यन्ते अध्यवसायास्तैः परस्परापेक्षैर्ज्ञानं समस्तवस्तुस्वरूपालम्बनं जन्यते, तदनवगतवस्तुपरिच्छेदाभ्युपायत्वात् प्रमाणं, ये पुनर्नैगमादयो निरपेक्षाः परस्परेण ते नयाभासा इति ॥१-६॥

પ્રમાણ અને નયોથી જીવાદિ તત્ત્વોનો બોધ

ટીકાર્થ– કરણભૂત એવા પ્રમાણ-નયોથી જીવાદિ તત્ત્વોનો બોધ થાય છે. પ્રમાણ-નયોનું લક્ષણ હવે પછી કહેવાશે. આ પ્રમાણે સૂત્રનો સંક્ષિપ્ત અર્થ છે. વિસ્તારથી અર્થ કહેવાની ઇચ્છાથી ભાષ્યકાર કહે છે- एषाम् ઇત્યાદિ, પ્રસ્તુતમાં બતાવેલા यथोद्दिष्टानां=ક્રમ પ્રમાણે સમૂહરૂપથી કહેલા, નામ-સ્થાપના આદિ ભેદોથી નિક્ષિપ્ત એવા જીવાદિ તત્ત્વોનો પ્રમાણ-નયોથી વિસ્તારથી બોધ થાય છે. નિક્ષિપ્ત એટલે વિશેષ બોધના ઉપાયરૂપે જેમનો નજીકમાં જ નિક્ષેપ કરવામાં આવ્યો છે તે, અર્થાત્ જીવ(આદિ) શબ્દના વાચ્ય અર્થ અનેક હોય છે, તેમાંથી કયા અર્થનું અહીં પ્રયોજન છે એમ વિશેષરૂપે જાણવા માટે જેમનો નિક્ષેપ કરવામાં આવ્યો છે તે. (જેમકે- નામજીવ, સ્થાપનાજીવ, દ્રવ્યજીવ, ભાવજીવ એ બધા જીવ છે. પણ તેમાં નામજીવ વગેરેનું અહીં પ્રયોજન નથી, કિંતુ ભાવજીવનું પ્રયોજન છે.) અહીં ભાવાર્થ આ પ્રમાણે છે- જેમનો जीवाजीवास्रव० એ સૂત્રમાં નામનિર્દેશ કર્યો છે, અને नामस्थापना० એ

સૂત્રમાં જેમનો નિક્ષેપ કર્યો છે તે જીવાદિ તત્ત્વોનો વિસ્તારથી બોધ પ્રમાણ-નયોથી થાય છે.

વિસ્તારથી બોધ– જીવાજીવા૦ એ સૂત્રમાંથી લીધેલા એક એક તત્ત્વનો લક્ષણ અને પ્રકારોથી થતો બોધ વિસ્તારથી બોધ છે.

જીવાદિ તત્ત્વોની વ્યાખ્યા પૂર્વવત્(=ચોથા સૂત્રમાં જણાવ્યા મુજબ) જાણવી. પ્રમાણ-નયો જ્ઞાનવિશેષ રૂપ છે.

જ્યારે પણ બોધ થાય છે ત્યારે પ્રમાણ-નયો વિના બોધ થતો નથી. આથી પ્રમાણની ચોક્કસ સંખ્યા બતાવવા માટે ભાષ્યકાર કહે છે- તત્ર પ્રમાણમ્ ઇત્યાદિ, તત્ર અવ્યય વાક્યના પ્રારંભ માટે છે. જેનાથી તત્ત્વનું જ્ઞાન થાય તે પ્રમાણ.

અહીં પ્રમાણ શબ્દ કરણ અર્થમાં છે. સુખાદિ ગુણસમૂહથી યુક્ત આત્મા [1]સાધકતમ એવા મતિ આદિથી પોતાના વિષયને જાણે છે.

પૂર્વપક્ષ– જો આત્મા કરણરૂપ મતિ આદિથી જાણે છે તો અજ્ઞાન રૂપ ક્રિયા પ્રમાણ બની. તેથી અજ્ઞાનરૂપ ક્રિયાથી જ્ઞાન થાય એમ થયું. અજ્ઞાનરૂપ ક્રિયાથી જ્ઞાન થાય એ અનિષ્ટની પ્રાપ્તિ છે.

ઉત્તરપક્ષ– આ આ પ્રમાણે નથી. કરણ આત્માનો જ પર્યાય છે. કરણ આત્માથી કથંચિદ્ અભિન્ન છે. અન્વય-વ્યતિરેકથી આત્માનો વિચિત્ર સ્વભાવ છે. (આત્મા હોય તો કરણથી બોધ થાય. આત્મા ન હોય તો કરણથી બોધ ન થાય.) તે કરણરૂપ પ્રમાણથી આત્મા જાણે છે એ સિદ્ધ થયું. તે આ પ્રમાણે- પરમાર્થથી ગ્રાહ્ય-ગ્રહણ સ્વભાવવાળો અને ક્રિયાથી કથંચિદ્ અભિન્ન આત્મા પ્રમાણ છે. તેથી અહીં પ્રમાણશબ્દ શબ્દની નીતિને અનુસરીને જેમાં કર્તા ગૌણ છે તેવી ક્રિયાને કહેનારો છે. ક્રિયા અને આત્માનો અભેદ હોવાથી આત્માને બોધ થાય છે. આથી કોઇ દોષ નથી.

---

૧. કરણ એટલે સાધકતમ. સાધકતમ એટલે કાર્યમાં અત્યંત ઉપયોગી. જેમકે दात्रेण लुनाति। અહીં લણવા રૂપ કાર્યમાં દાંતરડું કરણ છે=અત્યંત ઉપયોગી છે.

અહીં ભાવાર્થ આ પ્રમાણે છે– તત્ત્વ જેનાથી જણાય છે તે પ્રમાણ એવા શબ્દોને પકડીને વાદી કહે છે કે- જાણવાની ક્રિયા વિના તો કોઇ વસ્તુ જણાય જ નહિ. આથી ક્રિયા પ્રમાણ બની. ક્રિયા જડ છે-અજ્ઞાન-રૂપ છે. અજ્ઞાનરૂપ ક્રિયાથી બોધ(=જ્ઞાન) કેવી રીતે થાય ? અહીં સમાધાનમાં કહે છે કે- ક્રિયા અને આત્મા અભિન્ન છે. આત્મા જ્ઞાનસ્વરૂપ હોવાથી ક્રિયા પણ જ્ઞાનરૂપ છે. આથી જ્ઞાનથી જ જ્ઞાન થાય છે. પરમાર્થથી તો આત્મા જ પ્રમાણ છે. જો આત્મા જ ન હોય તો જાણવાની ક્રિયા કોણ કરે ? આમ આત્મા જ પ્રમાણરૂપ હોવા છતાં જેનાથી તત્ત્વ જણાય એવી વ્યુત્પત્તિમાં ક્રિયા કરનારને ગૌણ બનાવીને ક્રિયાને મુખ્ય રાખી છે. આથી ક્રિયા કરણ બની. ક્રિયા અને કરણ કથંચિત્ અભિન્ન છે. તેથી આત્માને બોધ થાય છે.

એ પ્રમાણે જે તત્ત્વને જાણે તે પ્રમાણ એવા કર્તૃસાધનપક્ષમાં પણ પૂર્વોક્ત પ્રમાણે ભાવના કરવી. મુખ્યતાથી તો આ પ્રમાણ શબ્દ કરણ સાધન જ છે, અર્થાત્ જેનાથી જણાય તે પ્રમાણ એવી વ્યુત્પત્તિથી જ સિદ્ધ થયેલો છે. આથી કર્તૃસાધનપક્ષમાં (શંકા-સમાધાનાદિ) પ્રયત્ન કરાતો નથી.

તેમાં પ્રમાણ બે પ્રકારનું છે એમ કહીને સંખ્યાનું નિયમન કર્યું છે, પ્રમાણ બે પ્રકારનું જ છે, ત્રણ વગેરે પ્રકારવાળું નથી.

પ્રમાણના બે પ્રકારને જ બતાવે છે- પ્રમાણ પરોક્ષ અને પ્રત્યક્ષ એમ બે પ્રકારે છે.

આનું વિશેષ વર્ણન આગળ (અ.૧ સૂ.૧૧-૧૨માં) કરવામાં આવશે.

પરોક્ષ– પરના નિમિત્તથી થતું જ્ઞાન પરોક્ષ છે. દ્રવ્યેન્દ્રિયો અને મન આત્માથી પર છે. આથી તેમના નિમિત્તથી થતું જ્ઞાન પરોક્ષ છે. જેમકે- ધૂમાડો જોઈને થતું અગ્નિનું જ્ઞાન.

પ્રત્યક્ષ– જે પદાર્થોનો ઉપભોગ કરે છે અથવા પદાર્થોમાં વ્યાપી જાય છે તે અક્ષ. આત્મા પદાર્થોનો ઉપભોગ કરે છે અથવા પદાર્થોમાં વ્યાપી જાય છે માટે અક્ષ એટલે આત્મા. નેત્ર, ઇન્દ્રિયો અને મનની અપેક્ષા

વિના પોતાનાથી જ આત્માને જે જ્ઞાન થાય તે પ્રત્યક્ષ. અવધિજ્ઞાન આદિ પ્રત્યક્ષ જ્ઞાન છે. ચ શબ્દ અવધિજ્ઞાન આદિમાં અનેક ભેદોના સંગ્રહ માટે છે. પ્રત્યક્ષજ્ઞાન અને પરોક્ષજ્ઞાનને (વિશેષથી) આગળ કહેશે.

પ્રશ્ન– પહેલાં પરોક્ષ અને પછી પ્રત્યક્ષજ્ઞાન કહેવામાં કોઈ કારણ છે ?

ઉત્તર– જીવોને પહેલાં પરોક્ષજ્ઞાન થાય છે પછી પ્રત્યક્ષજ્ઞાન થાય છે માટે પહેલાં પરોક્ષ અને પછી પ્રત્યક્ષજ્ઞાન કહ્યું છે.

કોઈક આચાર્યો પ્રત્યક્ષ, અનુમાન, ઉપમાન અને આગમ એમ ચાર પ્રકારનું પ્રમાણ માને છે. કારણ કે કેટલાક નૈગમ આદિ નયો ચાર પ્રકારવાળું પ્રમાણ સ્વીકારે છે. આથી જ અનુયોગદ્વાર ગ્રંથમાં ચાર પ્રકારના પ્રમાણનો ઉલ્લેખ કર્યો છે. આ ચાર પ્રકાર જે રીતે છે તે રીતે ભાષ્યકાર જ આગળ (૧-૩૫ સૂત્રમાં) બતાવશે.

આ પ્રમાણે પ્રમાણરૂપ અવયવના વિભાગો કરીને(=બતાવીને) હવે વ્યુત્પત્તિ આદિ દ્વારા નયરૂપ અવયવના વિભાગોને કરતા(=બતાવતા) ભાષ્યકાર કહે છે- નયાશ્ચ ઇત્યાદિ, જે પ્રાપ્ત કરે તે નયો, અર્થાત્ અનેક ધર્માત્મક વસ્તુનું "આ નિત્ય જ છે, અથવા આ અનિત્ય જ છે" એમ એક ધર્મથી નિરૂપણ કરે(=એક ધર્મવાળી બતાવે) તે નયો. નૈગમ વગેરે પાંચ નયોને આગળ (અ.૧ સૂ.૩૪માં) કહેશે. આથી જ સર્વનયોનું અવલંબન લેનારું જ્ઞાન અમારે પ્રમાણ છે. આથી જ નયોનું પ્રમાણથી અલગ કથન કર્યું છે. તે આ પ્રમાણે- વસ્તુના સંપૂર્ણ સ્વરૂપનું નિર્ણયાત્મક મતિ આદિ જ્ઞાન પ્રમાણ છે. આથી પ્રમાણ સમ્યગ્જ્ઞાન છે. નયો મિથ્યાજ્ઞાન છે. આથી કહ્યું છે કે "આ પ્રમાણે બધાય નયો મિથ્યાદૃષ્ટિ છે" ઇત્યાદિ. આથી જ પ્રમાણ સન્માનિત હોવાથી સૂત્રમાં પ્રમાણ શબ્દનો પહેલાં ઉલ્લેખ કર્યો છે. આથી સૂત્રમાં પ્રમાણ શબ્દનો પહેલાં ઉલ્લેખ કેમ કર્યો એવા પ્રશ્નને અવકાશ રહેતો નથી.

નય-નયાભાસ

બીજાઓ આ પ્રમાણે કહે છે- પરસ્પરની અપેક્ષા રાખનારા નૈગમ વગેરે નયરૂપે કહેવાય છે=નય તરીકે ઓળખાય છે. એ નયો દૃઢ

નિશ્ચયરૂપ છે. પરસ્પરની અપેક્ષાવાળા નયોથી વસ્તુના સંપૂર્ણ સ્વરૂપના આલંબનવાળું જ્ઞાન ઉત્પન્ન થાય છે. તે જ્ઞાન નહિ જાણેલી વસ્તુના નિર્ણયનું સાધન હોવાથી પ્રમાણ છે. પણ જે નૈગમ વગેરે પરસ્પરની અપેક્ષાથી રહિત છે તે નયાભાસ છે. (૧-૬)

टीकावतरणिका– 'किञ्चान्य'दित्यनेनोत्तरसूत्रं सम्बन्धयति, नैतावतैव विस्ताराधिगमस्तत्त्वानां, यतोऽन्यदपि विस्ताराधिगतौ कारणमस्ति, किं तत् ?, निर्देशादि, के पुनर्निर्देशादय इत्युक्त आह–

टीकावतरणिकार्थ– किञ्चान्यद्- આનાથી પછીના સૂત્રનો સંબંધ કરે છે. તત્ત્વોનો વિસ્તારથી બોધ આટલાથી જ થતો નથી, કિંતુ વિસ્તારથી બોધ કરવામાં અન્ય પણ કારણ છે. તે કારણ કયું છે ? તે કારણ નિર્દેશ વગેરે છે. તે નિર્દેશ વગેરે કયા છે ? એમ પૂછાયેલા ગ્રંથકાર કહે છે–

નિર્દેશ વગેરે છ દ્વારોથી તત્ત્વનો બોધ–

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥१-७॥

સૂત્રાર્થ– નિર્દેશ, સ્વામિત્વ, સાધન, અધિકરણ, સ્થિતિ અને વિધાનથી જીવાદિ તત્ત્વોનું જ્ઞાન થાય છે. (૧-૭)

भाष्यं– एभिश्च निर्देशादिभिः षड्भिरनुयोगद्वारैः सर्वेषां भावानां जीवादीनां तत्त्वानां विकल्पशो विस्तरेणाधिगमो भवति । तद्यथा- निर्देशः । को जीवः । औपशमिकादिभावयुक्तो द्रव्यं जीवः ।

सम्यग्दर्शनपरीक्षायाम् । किं सम्यग्दर्शनं द्रव्यम् । सम्यग्दृष्टिजीवोऽरूपी नोस्कन्धो नोग्रामः ॥ स्वामित्वम् । कस्य सम्यग्दर्शनमित्येतदात्मसंयोगेन परसंयोगेनोभयसंयोगेन चेति वाच्यम् । आत्मसंयोगेन जीवस्य सम्यग्दर्शनम् । परसंयोगेन जीवस्याजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति विकल्पाः उभयसंयोगेन जीवस्य नोजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति विकल्पा न सन्ति । शेषाः सन्ति ॥ साधनम् । सम्यग्दर्शनं केन भवति । निसर्गादधिगमाद्वा

भवतीत्युक्तम् । तत्र निसर्गः पूर्वोक्तः । अधिगमस्तु सम्यग्व्यायामः । उभयमपि तदावरणीयस्य कर्मणः क्षयेणोपशमेन क्षयोपशमाभ्यामिति । अधिकरणं त्रिविधमात्मसन्निधानेन परसन्निधानेनोभयसन्निधानेनेति वाच्यम् । आत्मसन्निधानमभ्यन्तरसन्निधानमित्यर्थः । परसन्निधानं बाह्यसन्निधानमित्यर्थः । उभयसन्निधानं बाह्याभ्यन्तरसन्निधानमित्यर्थः ॥ कस्मिन्सम्यग्दर्शनम्-आत्मसन्निधाने परसन्निधाने उभयसन्निधाने इति । आत्मसन्निधाने तावत् जीवे सम्यग्दर्शनं, जीवे ज्ञानं, जीवे चारित्र-मित्येतदादि । बाह्यसन्निधाने जीवे सम्यग्दर्शनं नोजीवे सम्यग्दर्शनमिति यथोक्ता विकल्पाः । उभयसन्निधाने चाप्यभूताः सद्भूताश्च यथोक्ता भङ्गविकल्पा इति ॥ स्थितिः । सम्यग्दर्शनं कियन्तं कालम् । सम्यग्दृष्टिर्द्विविधा । सादिः सपर्यवसाना, सादिरपर्यवसाना च । सादिसपर्यवसानमेव च सम्यग्दर्शनम् । तज्जघन्येनान्तर्मुहूर्तं, उत्कृष्टेन षट्षष्टिः सागरोपमानि साधिकानि । सम्यग्दृष्टिः सादिरपर्यवसाना । संयोगः शैलेशीप्राप्तश्च केवली सिद्धश्चेति ॥ विधानम् । हेतुत्रैविध्यात् क्षयादित्रिविधं सम्यग्दर्शनम् । तदावरणीयस्य कर्मणो दर्शनमोहस्य च क्षयादिभ्यः । तद्यथा- क्षयसम्यग्दर्शनं, उपशमसम्यग्दर्शनं, क्षयोपशम-सम्यग्दर्शनमिति । अत्र चौपशमिकक्षायोपशमिकक्षायिकाणां परतः परतो विशुद्धिप्रकर्षः ॥१-७॥

ભાષ્યાર્થ– આ નિર્દેશ વગેરે છ અનુયોગ દ્વારોથી જીવાદિ સર્વ પદાર્થોના તત્ત્વોનો વિવિધ રીતે વિસ્તારથી બોધ થાય છે. તે આ પ્રમાણે છે–

નિર્દેશ– પ્રશ્ન– જીવ કોણ છે ?

ઉત્તર– જે દ્રવ્ય ઔપશમિક વગેરે ભાવોથી યુક્ત હોય તે જીવ છે.

સમ્યગ્દર્શનની પરીક્ષામાં–

પ્રશ્ન– શું સમ્યગ્દર્શન દ્રવ્ય છે ?

ઉત્તર– સમ્યગ્દર્શન એ જીવનો ગુણ છે. આ ગુણ જેને હોય તે જીવ સમ્યગ્દૃષ્ટિ કહેવાય. જીવ રૂપાદિ ધર્મોથી રહિત છે તેથી સમ્યગ્દર્શન

અરૂપી છે. પંચાસ્તિકાય સ્કંધ સ્વરૂપ છે. સમ્યગ્દર્શન નોસ્કંધ, નોગ્રામ છે. નો શબ્દ દેશવાચી છે, અર્થાત્ સમ્યગ્દર્શન સ્કંધ પણ નથી અને સ્કંધ રહિત પણ નથી. તેમ ગ્રામમાં સમજવું.

સ્વામિત્વ– પ્રશ્ન– સમ્યગ્દર્શન કોને હોય ?

ઉત્તર– સમ્યગ્દર્શન આત્મસંયોગથી, પરસંયોગથી અને ઉભય સંયોગથી થાય છે એમ કહેવું. આત્મસંયોગથી સમ્યગ્દર્શન જીવનું છે. પરસંયોગથી સમ્યગ્દર્શન જીવનું, અજીવનું, બે જીવોનું, બે અજીવોનું અને ઘણાં જીવોનું, ઘણાં અજીવોનું એવા વિકલ્પો છે. ઉભય સંયોગથી જીવનું, નો જીવનું. બે જીવનું, બે અજીવનું. ઘણાં જીવોનું અને ઘણાં અજીવોનું એવા વિકલ્પો નથી. બાકીના વિકલ્પો છે.

સાધન– પ્રશ્ન– સમ્યગ્દર્શન કોનાથી થાય ?

ઉત્તર– સમ્યગ્દર્શન નિસર્ગથી કે અધિગમથી થાય છે એમ પૂર્વે કહ્યું છે. તેમાં નિસર્ગ પૂર્વે કહેવાઈ ગયો છે. અધિગમ એટલે સમ્યગ્વ્યાયામ. ઉભય (નિસર્ગ અને અધિગમ એમ ઉભય) પણ દર્શનાવરણીયકર્મના ક્ષયથી, ઉપશમથી કે ક્ષયોપશમથી થાય છે.

અધિકરણ– આત્મસન્નિધાન, પરસન્નિધાન અને ઉભયસન્નિધાનની અપેક્ષાએ અધિકરણ ત્રણ પ્રકારનું કહેવું. આત્મસન્નિધાન એટલે અભ્યંતરસન્નિધાન. પરસન્નિધાન એટલે બાહ્યસન્નિધાન. ઉભયસન્નિધાન એટલે બાહ્ય અને અભ્યંતર એમ બંને સન્નિધાનોનું મિશ્રણ.

પ્રશ્ન– સમ્યગ્દર્શન કોનામાં હોય ?

ઉત્તર– સમ્યગ્દર્શન આત્મસન્નિધાનમાં, પરસન્નિધાનમાં અને ઉભય-સન્નિધાનમાં હોય છે. આત્મસન્નિધાનમાં એટલે જીવમાં સમ્યગ્દર્શન હોય, એ રીતે જ્ઞાન જીવમાં હોય છે, ચારિત્ર જીવમાં હોય છે વગેરે જાણવું. બાહ્યસન્નિધાનની અપેક્ષાએ જીવમાં સમ્યગ્દર્શન હોય, નોજીવમાં સમ્યગ્દર્શન હોય. આ વિકલ્પોને પહેલા કહ્યું તેમ જાણી લેવા.

ઉભયસન્નિધાનમાં પણ અસદ્‌ભૂત અને સદ્‌ભૂત ભંગ વિકલ્પો પૂર્વે કહ્યા મુજબ જાણવા.

સ્થિતિ– પ્રશ્ન– સમ્યગ્‌દર્શન કેટલા કાળ સુધી રહે ?

ઉત્તર– સમ્યગ્‌દર્શન સાદિ સાન્ત અને સાદિ અનંતકાળ સુધી રહે. સાદિ સાન્ત સમ્યગ્‌દર્શન જઘન્યથી અંતર્મુહૂર્ત્ત અને ઉત્કૃષ્ટથી સાધિક છાસઠ સાગરોપમ સુધી રહે છે. સાદિ અનંતભાંગે સમ્યગ્‌દર્શન સયોગી કેવલી, શૈલેશી પ્રાપ્ત કેવલી અને સિદ્ધને હોય છે.

વિધાન– સમ્યગ્‌દર્શનની ઉત્પત્તિમાં ત્રણ કારણ હોવાથી ક્ષાયિક વગેરે ત્રણ પ્રકારનું સમ્યગ્‌દર્શન છે. સમ્યગ્‌દર્શનને રોકનારા (અનંતાનુબંધી કષાયરૂપ) કર્મના અને દર્શનમોહના ક્ષય આદિથી સમ્યગ્‌દર્શન ઉત્પન્ન થાય છે. તે આ પ્રમાણે- ક્ષયથી ઉત્પન્ન થયેલું સમ્યગ્‌દર્શન ક્ષાયિક છે, ઉપશમથી ઉત્પન્ન થયેલું સમ્યગ્‌દર્શન ઔપશમિક છે, ક્ષયોપશમથી ઉત્પન્ન થયેલું સમ્યગ્‌દર્શન ક્ષાયોપશમિક છે. અહીં ઔપશમિક, ક્ષાયોપશમિક અને ક્ષાયિક એ ત્રણમાં પછી પછીના સમ્યગ્‌દર્શનમાં વિશુદ્ધિ વધારે હોય છે. (૧-૭)

ટીકા– न तावन्निर्देशादीनेव व्याचष्टे, सम्बन्धवाक्यमेव समर्थयति-'एभिश्चे'त्यादि, एभिश्च, चशब्दात् प्रमाणनयसदादिभिश्च, एभिश्चेति सामान्यशब्दनिर्देशे न विशेषावगतिरस्त्यतो विशेषार्थमाह-(निर्देशा-दिभिरिति)निर्देशशब्देन निर्देशे सति नेयत्तापरिज्ञानमस्तीति, समासे चाव्यक्ताभिधानं प्रसिद्धं, न सूत्रादपीयत्तासम्भाव्येत, अतः 'षड्भि'-रित्याह, उक्तेऽपि षड्भिरित्यस्मिन् किमेतानि व्याख्याद्वाराणि उत नेति याऽऽशङ्का तन्निरसनायाह-अनुयोगद्वारैः, व्याख्यान्तरैरित्यर्थः, एषां च व्यापिताऽस्ति नास्तीति आशङ्काव्युदासायाह-'सर्वेषा'मिति, उक्तेऽपि चैतस्मिन्नभावो सर्वशब्देनोपात्तस्तन्निराचिकीर्षयाऽऽह-'भावाना'मिति, अभावो हि व्यर्थत्वात् प्रयासस्य न तद्विषयमेतदिति कथयति, भावा

अप्यन्यमताभिमताः सन्त्यतत्त्वरूपा इत्यतो द्वयमुपादत्ते-'जीवादीनां तत्त्वाना'मित्येतत्, ते च जीवादयः किमेभिः समासेन निरूप्यन्ते उत व्यासेनेत्यत आह-'विकल्पश'इति, शसश्च कारकसामान्याद्विधानमिति तृतीयार्थ एष इति, एतत् कथयति-'विस्तरेणे'त्यनेन, उक्तेऽपि चैतस्मिन्नसम्पूर्णमेव वाक्यं स्यात्, यदि पूर्वसूत्रादधिगत इत्येतन्नानुवर्तते, अतोऽनुवर्तत इति कथयति-अधिगम इति, सत्तां च पदार्थो न व्यभिचरति यद्यपि तथापि अन्यास्याः क्रियाया नाध्याहारः कर्त्तव्यः, ततश्च-भवतीत्याह, अनेनैव सूत्रसमुदायो व्याख्यातः, अवयवार्थं तु व्याख्यानयन्नाह-'तद्यथे'त्यादि, यथैते भाव्यन्ते निर्देशादयस्तथा कथ्यन्ते, निर्देश इति व्याख्येयावयवोपन्यासः, अस्य तूद्देशपूर्वकत्वात् प्रश्ने सति निर्देशोपपत्तेरेतद्व्याचिख्यासयैवोद्देशमाह-'को जीव'इति, किं द्रव्यं गुणः क्रियेति पृष्टे निर्दिशति-'औपशमिकादी'त्यादि, औपशमिकादयो वक्ष्यमाणास्त एव भावाः तथाभवनादात्मनः तैर्युक्तः द्रव्यं जीवः, न द्रव्यमात्रं, नापि केवला भावाः, उभयमित्यर्थः १। स्वामित्वादयो जीवेऽभ्युह्या अनया दिशेति न दर्शितवान्, वयं तु दर्शयामः, स्वामी-प्रभुस्तद्भावः स्वामित्वं, जीवो हि कस्य प्रभुः ?, जीवस्य वा के स्वामिन ? इति, उच्यते, जीव एकोऽवधी(ऽधि)कृतः धर्म्मादीना-मस्तिकायानां स्वामी, यतः सर्वेषु मूर्च्छां यात्युपलभते परिभुङ्क्ते शरीरतया वाऽऽदत्ते अतः सर्वेषां जीवः स्वामी, जीवस्यापि जीवाः अन्ये तन्मूर्च्छाकारिणः स्वामिनो भवन्ति २। साध्यते येन तत् साधनं, केन चात्मा साध्यते ?, उच्यते, नान्येनासौ, सततमवस्थितत्वात्, बाह्यान् वा पुद्गलानपेक्ष्य देवादिजीवस्तैः साध्यत इति, तैः स्वस्थानं नीयत इतियावत् ३। अधिकरणमाधारः, कस्मिन्नात्मा ?, निश्चयस्य स्वात्मप्रतिष्ठत्वात् आत्मनि, व्यवहारस्य शरीराकाशादौ स्थितः, आत्मरूपादनपगमः ४। कियन्तं कालमेष जीवभावेनावतिष्ठते ?, भव(चक्र)मङ्गीकृत्य सर्वस्मिन्

काले, देवादींस्तु भवानङ्गीकृत्य यावती यत्र स्थितिस्तावन्तं कालं तत्रावतिष्ठत इति ५। विधानं प्रकारः, कतिप्रकारा जीवाः ?, त्रसस्थावरादिभेदाः, एवं शेषा अपि सिद्धान्तानुसारिण्या धिया अवलोक्य पारमार्षं प्रवचनं वाच्याः, ग्रन्थगौरवभयात्तु नादिद्रिये भाष्यकारः, तथा यदर्थं शास्त्रप्रवृत्तिस्तत्रापि योजनां निर्देशादीनां कुर्वन्नाह-'सम्यग्दर्शन-परीक्षाया'मित्यादि, यदा सम्यग्दर्शनं परीक्ष्यते तदापि सम्यग्दर्शनं किं गुणः ? क्रिया ? द्रव्यमिति पृष्टे निर्देशा भवन्ति, उच्यते-द्रव्यं, कथं ?, ये जीवेन शुभाध्यवसायविशेषेण विशोध्य पुद्गलाः प्रतिसमयमुपभुज्यन्ते अतस्ते सम्यग्दर्शनस्य निमित्तं, तदुपष्टम्भजन्यत्वात् तत्त्वार्थश्रद्धान-परिणामस्य, ततश्च कारणे कार्योपचारात् द्रव्यं सम्यग्दर्शनं, मुख्यया वृत्त्या तु तत्त्वार्थश्रद्धानरूप आत्मपरिणामः, सोऽपि नात्मव्यतिरिक्त एवेति द्रव्यमित्युक्तं, आह-यदि यथोक्ताः पुद्गलास्तदुपष्टम्भजन्यो वाऽऽत्मपरिणामः सम्यग्दर्शनं न तर्हि क्षीणदर्शनमोहनीयस्य छद्मस्थ-केवलिसिद्धजीवस्य सम्यग्दर्शनमित्युक्ते आह-'सम्यग्दृष्टिर्जीव'इति सम्यक्-शोभना सदसत्पदार्थावलोकिनी दृष्टिर्यस्य स क्षीणदर्शनमोहनीयस्य सम्यग्दृष्टिर्जीव इति, एतदुक्तं भवति-क्षीणे दर्शनमोहनीये न सम्यग्दर्शनी भण्यते, किं तर्हि ?, सम्यग्दृष्टिरेवेति, अतः सिद्धसाध्यतेतिभावः, स पुनः क्षीणदर्शनमोहः किं रूपी ?, नेत्याह-'अरूपी' अविद्यमानं रूपमस्येत्यरूपी, सर्व्वधर्म्मादिषु क्षेप्यः, नासौ रूपादिधर्म्मसमन्वितः, अमूर्त्त आत्मेति, छद्मस्थकेवलिनोर्यद्यपि कर्म्मपटलोपरागस्तथाप्यात्मा न स्वभावमपजहाति, आगन्तुकं हि कर्म्मरजो मलिनयत्यात्मानमभ्रादि-वच्चन्द्रमसं, सिद्धास्तु सर्वथाप्यरूपा एव, स एव सम्यग्दृष्टिः इदानीमा-शङ्क्येत-किं स्कन्धो ग्राम इति, तन्निरासायाह-'नो स्कन्धः' अरूपत्वादेव न स्कन्धः-पुद्गलादिरूपः, स्वप्रदेशाङ्गीकरणात्तु स्यात् स्कन्धः, अथवा पञ्चास्तिकायसमुदिताः स्कन्धः, नोशब्दस्य तद्देशवाचित्वान्नोस्कन्धः

सम्यग्दृष्टिः, एवं नोग्रामोऽपि वक्तव्यः, चतुर्दशभूतग्रामैकदेशत्वात् सम्यग्दृष्टेरिति । सम्प्रति स्वामित्वशब्दोच्चारणात् स्वामीत्यनेन 'कस्य' स्वामिनः सम्यग्दर्शनमिति, उद्देशवाक्यमेवं कृत्वा प्रवृत्तं-किं यत्समवाय्येतत् तस्यैवैतत्, उत तदुत्पत्तिनिमित्तभूतस्यान्यस्यापि, व्यवहारार्थमाश्रीयते ? इति, उच्यते, मुख्येन तावत् कल्पेन यद् यत्र समवेतं तत् तस्यैवेति, व्यवहारार्थं तु निमित्तभूतस्याप्याश्रीयते, एतदाह-'आत्मसंयोगेने'त्यादि, आत्मसंयोगेन-आत्मसम्बन्धेन, यदा ह्युत्पद्यमानस्य सम्यग्दर्शनस्य परतोऽपि निमित्तात् प्रतिमादिकात् नापेक्षा क्रियते प्रतिमादेस्तदाऽसौ परिणाम आत्मनि समवेत इतिकृत्वा स एवात्मा तेन परिणामेन तानि तत्त्वान्येवमभिमन्येत अत आत्मसंयोगेन जीवस्य सम्यग्दर्शनं, जीवस्य स्वामिनः सम्यग्दर्शनं-रुचिरिति, 'परसंयोगेने'ति परं-साधुप्रतिमादि वस्तु तन्निमित्तीकृत्य श्रद्धानपरिणाम उपजायते ततः स परिणामस्तत्कर्तृक इति तस्य व्यपदिश्यते, अत्र परसंयोगे षड् विकल्पा भवन्ति-जीवस्येत्यादयः, यदाऽस्य जन्तोः परमेकं मुनिमालम्ब्य क्रियानुष्ठानयुक्तं सा रुचिरुपजायते, क्षयोपशमो हि द्रव्यादिपञ्चकमुररीकृत्य प्रादुरस्ति, अतो बहिरवस्थितस्य साधोरुत्पादयितुः सा रुचिः, स्वं कुम्भ इव कुम्भकारस्येति, एवमेकमजीवाख्यं पदार्थं प्रतिमादिकं प्रतीत्य यदा क्षयोपशमः समुपजायतेऽतस्तदा तस्यैवाजीवस्य सम्यग्दर्शनं नात्मन इति, यदा पुनर्द्वौ साधू निमित्तं क्षयोपशमस्य विवक्षितौ नात्मा तदा जीवयोः सम्यग्दर्शनं, यदा पुनरजीवौ प्रतिमाख्यावुभौ निमित्तीकृतौ तदा तयोः स्वामित्वविवक्षायां तत् सम्यग्दर्शनमिति, यदा पुनर्बहवो जीवाः साधवस्तस्योत्पत्तौ निमित्तं भवन्ति तदा जीवानां सम्यग्दर्शनं, न तु यत्र समवेतमिति, यदा पुनर्बह्वीः प्रतिमा भगवतां दृष्ट्वा तत्त्वार्थश्रद्धानमाविर्भवति तदा च तासामेव तत्कर्तृकत्वात् नात्मन इति, 'उभयसंयोगेने'ति यदाऽऽत्मनोऽन्तरङ्गस्य बहिरङ्गस्य च साध्वादेस्तद्विवक्ष्यते तदा उभौ

तस्य सम्यग्दर्शनस्य स्वामिनौ भवतः इत्युभयसंयोगोऽभिधीयते, अत्र च लाघविक आचार्यो हेयान् विकल्पानादर्शयति, आदेयाः पुनरुपात्त-व्यतिरिक्ताः, अयं तावदत्र विकल्पो न सम्भवति-जीवस्य सम्यग्दर्शनमिति, यतोऽनेन षष्ठ्यन्तेन सम्यग्दर्शनस्य यः समवाय्यात्मा स वा भण्यते बाह्यो वा तीर्थकरादिः यमवलोक्य स तादृशः परिणतिविशेषः समुदभूदिति ?, तत्र यद्यात्मा समवायी सम्बध्यते नास्ति तदा परस्य सम्बन्धः, उभयसंयोगेन चैतच्चिन्त्यते, अथवा यदि तीर्थकरादिरभिसम्बध्यते तदा नात्माभिसम्बन्धः, अतः त्याज्य एवायं विकल्पः, एवं नोजीवस्येति, अजीवस्येत्यर्थः, एकस्याः प्रतिमायाः विवक्षितत्वादुभयसंयोगाभाव इति हेयो विकल्पः, तथा जीवयोः सम्यग्दर्शनमिति न सम्भवति, यस्माद्वा तत्र समवायिनौ पुरुषौ स्वामितया विवक्षितौ, मम च सम्यग्दर्शनमस्य च सम्यग्दर्शनमुत्पन्नमिति, यतस्तु तदालम्ब्योत्पन्नं तस्याविवक्षितस्वामितया उत्पादनिमित्तयोश्चोभयसंयोगो विवक्षितः अतस्त्यज्यते, तथा अजीवयोः सम्यग्दर्शनमिति, द्वयोः प्रतिमयोरालम्बनीकृतयोर्भेदेन तद्विवक्षितं, यत्र तु समवेतं तत्राविवक्षा, अतस्त्यज्यते अयमपि विकल्पः तथा पञ्चमोऽपि त्याज्यः-जीवानामिति, अत्र बहव एव सम्यग्दर्शनसमवायिनो विवक्षिता जीवाः-अस्य चास्य चास्य चेति, न तु येनालम्बनेन तेषामुत्पन्नं तस्य तत् सम्यग्दर्शनं विवक्षितं, तस्मादयमपि त्याज्यः, षष्ठोऽप्यजीवानामिति त्यज्यते, आलम्ब्यानां बहूनां प्रतिमानामेतत् सम्यग्दर्शनं विवक्षितं, यत्र तूत्पन्नं तदविवक्षितमिति त्याज्य एष षष्ठो विकल्पः, एवमेते उभयसंयोगविवक्षायां षडपि त्यक्ताः, आदेया अपि षडेव, यथा जीवस्य च जीवस्य च, यस्य तदुत्पन्नं तस्य च तत्परिणन्तुः यं च निमित्तीकृत्य साधुमुपजायते तद्दर्शनं तस्य च तदिति, उभयोर्विवक्षितत्वात् स तत्त्वेन विकल्पः सम्भाव्यते १। तथा यस्य तदुत्पन्नं यस्य च विवक्षितं याभ्यां च दृश्यमानाभ्यां

साधुभ्यां तदुत्पादितं तयोश्च साधुजीवयोस्तत् सम्यग्दर्शनमुभयत्रापि सतत्त्वेन विवक्षितत्वाज्जीवस्य जीवयोश्च द्वितीयो विकल्पः २। तथा यस्य तदुत्पन्नं यस्य च विवक्षितं यैश्च दृश्यमानैः साधुभिस्तदुत्पादितं तेषां च साधुजीवानां तत् सम्यग्दर्शनं, उभयत्रापि सतत्त्वेन विवक्षितत्वात् जीवस्य जीवानां च तृतीयो विकल्पः ३। तथा यस्य तदुत्पन्नं तस्य च विवक्षितं यया च दृश्यमानया प्रतिमया अजीवरूपयोत्पादितं तस्याश्च तदिति, तदा जीवस्य च तस्याश्च प्रतिमायाः तदिति सम्भाव्यते विकल्पो जीवस्याजीवस्य चेति ४। तथा जीवस्य यस्य तदुत्पन्नं याभ्यां प्रतिमाभ्यां दृश्यमानाभ्यां तदुत्पादितं उभयत्र विवक्षितत्वात् सम्भाव्यते अयं विकल्पो-जीवस्याजीवयोश्चेति ५। तथा यस्य तदुत्पन्नं याभिश्च प्रतिमाभिर्दृश्यमानाभिरुत्पादितं सर्वत्र विवक्षितत्वाज्जीवस्याजीवानां चेति भङ्गकः सम्भाव्यते ६। एतदाह-'शेषाः सन्ति' षडित्यर्थः, २।

सम्प्रति तृतीयं द्वारं परामृशन्नाह-'साधन'मिति, साध्यते-निर्वर्त्यते येन तत् साधनं, अत्र पृच्छ्यमानं, तदाह-'सम्यग्दर्शनं केन भवति' याऽसौ रुचिः सुविशुद्धसम्यक्त्वदलिकोपेता सा केन भवतीति ?, अत आह-'निसर्गादधिगमाद्वा भवतीत्युक्तं' एतत् कथयति-न तावेव निसर्गाधिगमौ तादृशीं रुचिं जनयतः, किन्तु निसर्गाधिगमाभ्यां क्षयोपशमादयः कर्मणां जन्यन्ते, ततः क्षयोपशमादेः सम्यग्दर्शनं भवति, तावपि च निसर्गाधिगमौ कर्मणां क्षयोपशमादेरेव भवतः, ततस्ताभ्यामुत्तरोत्तरं क्षयोपशमं विशुद्धं विशुद्धतरमापादयमानाभ्यां यदा प्रतिविशिष्टः क्षयोपशमः आपादितो भवति तदा तस्मात् प्रतिविशिष्टात् क्षयोपशमात् सम्यग्दर्शनं भवतीति कथयति, तत्र निसर्गे बहु वक्तव्यमिति प्राक् तद्दर्शितमेव, एकेन च वाक्येन न शक्यं तत् समस्तं दर्शयितुमित्यतिदिशति 'तत्र निसर्गः पूर्वोक्तः', अधिगमोऽल्पविचारत्वादेकेन वाक्येन, समस्ताधिगमोपसंहारभावादाह-'अधिगमस्तु सम्यग्व्यायाम'इति, गुर्वादि-

समीपाध्यासिनः शुभा क्रिया सम्यग्दर्शनोत्पादने शक्ता सा सम्यग्व्यायाम इत्युच्यते, 'उभयमपी'त्यादि, उभयमपीति-निसर्गसम्यग्दर्शनमधिगम-सम्यग्दर्शनं, तौ च निसर्गाधिगमावुभावपि, कथं भवतः ?, अत आह 'तदावरणीयस्ये'त्यादि, तस्य-तत्त्वार्थश्रद्धानलक्षणस्य सम्यग्दर्शनस्य यदावरणीयम्-अनन्तानुबन्ध्यादि कर्म्म तस्य कर्म्मणः क्षयेण-उक्त-लक्षणेनोपशमेन च क्षयोपशमाभ्यामिति च प्राप्यत इति। अत्र कश्चिदाह-तदावरणीयस्येति तत्त्वार्थश्रद्धानलक्षणज्ञानावरणीयं गृह्यते, ज्ञानावरणीय-वर्ज्जिते कर्मणि प्राय आवरणीयव्यवहाराभावात्, अत एव दर्शनं ज्ञान-मिति, एतच्चायुक्तं, ज्ञानावरणीयस्योपशमाभावात्, स्यादेतत्, सत्यमेतत्, किन्तु मोहनीयोपशमात् यो ज्ञानावरणीयक्षयादिः ततः सम्यग्दर्शनमिति, तदप्ययुक्तं, उपशमेनेति पक्षान्तरोपन्यासानुपपत्तेः, हेतोः फलात् पूर्वमुपादानात् अतिप्रसङ्गाच्च, सातादुदयादपि क्वचिद् ज्ञानावरणीय-क्षयादिभावादौदयिकप्रसङ्गादिति यत्किञ्चिदेतत्, तस्मात् सम्यग्दर्शनावार-कमित्यनेनानन्तानुबन्ध्याद्येव तदावरणीयमुक्तमिति न दोषः ३।

सम्प्रत्यधिकरणद्वारं परामृशति-'अधिकरण'मिति, अधिक्रियते यत्र तदधिकरणं आधारः-आश्रय इति, स च आधारस्त्रिविधः-आत्मा वा यत् समवेतं दर्शनं मुख्यतः, उपचारात् परत्र भवति, यत्राश्वादौ सम्य-ग्दृष्टिर्व्यवस्थितः तस्मिन्नपि तत्, उभयविवक्षायां चोभयत्र तत् आत्मनि परत्र च, एतदेव त्रैविध्यं दर्शयन्नाह-आत्मसन्निधानेनात्मन्येव स्थितमित्यर्थः परसन्निधानेन परत्र स्थितमिति, आत्मस्थमपि तदस्मिन् पक्षे न विवक्ष्यते, उभयसन्निधानेनात्मनि परत्र चेति वाच्यं, आत्मसन्निधानमिति चास्यार्थं सुहृद्भूत्वा कथयति-आत्मसन्निधानमभ्यन्तरसन्निधानमित्यर्थः, आत्मै-वाधार आत्मसन्निधानं, प्रसिद्धतरेण स(स्व)शब्देनाभ्यन्तरसन्निधानमिति व्यपदिष्टं, आन्तरः-आसन्नस्तस्य सम्यग्दर्शनस्येति, परसन्निधानमिति चास्यार्थं विवृणोति-'बाह्यसन्निधानं' बाह्यम्-आसनादि, यत्रस्थस्य

सम्यग्दर्शनभाव इति, एवमुभयभावना कार्या, अधुनाऽऽधारे त्रिविधे कथिते परस्यैतदेव सन्देहकारणं जातं-क्व तर्हि सम्यग्दर्शनमिति ?, पृच्छति-'कस्मिन् सम्यग्दर्शनं' अथवा अन्यथा प्रश्नः, सम्यग्दर्शनमित्येष गुणः, गुणस्य आश्रयेण भवितव्यं, स पुनराश्रयः किमभ्यन्तर आत्मा उत बाह्यं प्रतिमादि वस्तु यदुपष्टम्भेनोपजातं ! उतोभयमिति प्रश्निन आह-'आत्मसन्निधाने तावदि'त्यादि, आत्माधारविवक्षायां जीवे सम्यग्दर्शनं, तस्य अन्यत्रादर्शनात्, यथा सम्यग्दर्शनमेवं ज्ञानचारित्रे अपीति, एतदाह-'जीवे ज्ञानं जीवे चारित्र'मिति, न च ज्ञानदर्शनचारित्राणि विरहय्य अन्यो जीवोऽस्तीति, काल्पनिकमुपदिशति, कथं ?, यदा तावज्जीवे सम्यग्दर्शनं तदा ज्ञानचारित्रे आधारभावं प्रतिपद्येते, ज्ञानचारित्रात्मनि जीवे सम्यग्दर्शनं, यदा जीवे ज्ञानं तदा दर्शनचारित्र-योराधारता, यदा जीवे चारित्रं तदा ज्ञानदर्शनगोचरात् चारित्रमाधेयमिति, 'एतदादी'ति, एतानि-ज्ञानादीनि आदिर्यस्य गुणान्तरस्य तदेतदादि, तदपि जीवे आधारे दृश्यं भव्याभव्यत्वादि 'बाह्यसन्निधानेन जीवे सम्यग्दर्शन'मित्यादि, ननु चात्मन्येवोपलभ्यत इत्युक्तं कथमिदानीं परस्मिन्नपि व्यपदिशति ?, उच्यते, न यदेव यत्राविभागेनावस्थितं तदेव तत्रेत्युच्यते, किन्तु अन्यत्रापि व्यवस्थितमन्यत्रोपदिश्यते, यथा पर्यंकस्थो गेहे देवदत्तः, गेहस्थो नगर इति, जीवे सम्यग्दर्शनादीत्यादयो विकल्पाः पूर्वं भाविता एव, इहाप्याधारभेदं केवलमुच्चारयता सर्वं तथैव भावनीयं, उभयसन्निधानेनाभूताः सद्भूताश्च षडेव यथोक्ता भङ्गा एव विकल्पाः भङ्गेषु वा विकल्पा इति, अत्राह- स्वामित्वाधिकरणार्थयोर्न कश्चिदर्थभेद इति किमर्थं भेदाभिधानं ?, उच्यते, एकत्र सम्बन्धविवक्षा परत्राधार-विवक्षेति, अस्ति चानयोर्भेदः देवदत्तस्य पुत्रो नगरासनादौ तिष्ठतीति यथा ४।

स्थितिद्वारं स्पृशति-'स्थिति'रिति, एतद् विवृणोति-'सम्यग्दर्शनं कियन्तं कालमुत्पन्नं सदवतिष्ठते, 'कालाध्वनो'रिति द्वितीया, प्रश्न-

यितुरयमभिप्रायः-प्रागभूत्वा मिथ्यादृष्टेर्दर्शनमाविश्चकास्ति, यच्चोत्पत्तिमत् तत् सादि सपर्यवसानं दृष्टं मनुष्यादिवत्, किञ्चित् सादिरपर्यवसानं सिद्धत्वादिवत्, आचार्योऽपि प्रश्नाभिप्रायानुरूपमेवोत्तरमाह-'सम्यग्दृष्टिर्द्विविधे'त्यादि, द्विविधेति सादिः सपर्यवसाना सादिरपर्यवसाना चेत्येवं द्विविधा, शोभना दृष्टिः सम्यग्दृष्टिः, का च शोभना ?, या शुद्धकर्म्मदलिककृता या च दर्शनमोहनीयक्षयात् त्रयाणां भवति छद्मस्थस्य श्रेणिकादेरिव, अपरा भवस्थस्यापायसद्द्रव्यपरिक्षये केवलिनः, अपरा सिद्धस्येति, तत्र या अपायसद्द्रव्यवर्तिनी श्रेणिकादीनां च सद्द्रव्यापगमे भवति अपायसहचारिणी सा सादिसपर्यवसाना, यस्मिन् काले श्रेणिकादिभिर्दर्शनमोहसप्तकं क्षपयित्वा रुचिराप्ता स आदिस्तस्याः, यदा त्वपायः-आभिनिबोधिकमपगतं भविष्यति केवलज्ञान उत्पन्ने सोऽन्तोऽस्याः सम्यग्दृष्टेः, एतदाह-'सादिः सपर्यवसाने'ति, या तु भवस्थकेवलिनो द्विविधस्य सयोगायोगभेदस्य सिद्धस्य वा दर्शनमोहनीयसप्तकक्षयादपायसद्द्रव्यक्षयाच्चोदपादि सा सादिरपर्यवसानेति, यस्मिन् काले दर्शनमोहनीयं क्षपयित्वा प्राप्ता स आदिस्तस्याः, एवमेतत्तत्त्वमित्येवंविधा या रुचिः सा न कदाचित् तस्यापैष्यतीति, एवं यथाक्रममुपन्यस्तं स्वयं व्याख्यानयति, सादिसपर्यवसानेति यदुक्तं तस्येदं व्याख्यानं-'सादिसपर्यवसानमेव च सम्यग्दर्शनं' यच्चापायसद्द्रव्यवर्त्ति तच्च सम्यग्दर्शनमितीह भणति, यच्च सद्द्रव्यविरामे अपायसम्भवे श्रेणिकादीनां तच्च भणति, कथं च सादीति ?, सह आदिना वर्त्तत इति सादिः, यस्मिन् काले मिथ्यादर्शनपुद्गलान् विशोध्य स्थापयति सम्यग्दर्शनतया तदा सादिः, यदा त्वनन्तानुबन्ध्युदयात् पुनर्मिथ्यादर्शनतया परिणाममानेष्यति क्षपयित्वा वा तान् सम्यग्दर्शनपुद्गलान् केवली भविष्यति तदा सपर्यवसानं, सह पर्यवसानेन-अन्तेन यद्वर्त्तते तत् सपर्यवसानमेव सम्यग्दर्शनं, यदा च दर्शनसप्तकं क्षपयित्वा

प्राप्नोति श्रेणिकादिः स आदिस्तस्य, केवलप्राप्तावन्त इति, तत् पुनः सम्यग्दर्शनं सादिसपर्यवसानं शुद्धदलिकसहवर्त्तिनी रुचिः कियन्तं कालं भवतीति यत् पुरस्ताच्चोदितं तद्भावयन्नाह-'तज्जघन्येने'त्यादि, 'सुप्सुपे'ति समासो भवति, अत्यन्तसंयोगे कालस्य द्वितीया, एतदुक्तं भवति-तथा सम्यग्दर्शनं कश्चिज्जन्तुर्द्वे घटिके तत्परिणाममनुभूय पुनर्मिथ्यादर्शनीभवति केवली वा परतः, एवं जघन्यां स्थितिमाख्यायोत्कृष्टां निरूपयन्नाह-'उत्कृष्टेने'त्यादि, उत्कर्षेण कियन्तं कालमास्ते ?, षट्षष्टिः सागरोपमाणि साधिकानि, तद्भावना-इहाष्टवर्षे सम्यग्दर्शनमधिगम्य समासादितदीक्षः पूर्वकोटिं विहृत्य अष्टवर्षोनामपरिच्युतसम्यग्दर्शनः विजयादीनां चतुर्णामन्यतमस्मिन् विमाने उदपादि स्थितावुत्कृष्टायां, त्रयस्त्रिंशत्सागरोपमस्थितिः, तत्क्षयाच्च प्रच्युत्य मनुजेषु सहदर्शनः समुत्पन्नः, पुनस्तेनैव प्रकारेण संयममनुष्ठाय तदेव विमानं तावत्-स्थितिकमनुप्राप्तः, पुनः स्थितौ क्षीणायामक्षीणतत्त्वार्थश्रद्धानः संयमं प्राप्यावश्यंतया सिद्ध्यति, एवं द्वे त्रयस्त्रिंशतौ षट्षष्टिः पूर्वकोटि-त्रयातिरिक्ता, अच्युतकल्पे वा द्वाविंशतिसागरोपमस्थितिः तिस्रो वाराः समुत्पद्यते, ततः परं अवश्यंभाविनी तस्य सिद्धिरिति । यदुक्तं पुरस्तात् 'सम्यग्दृष्टिर्द्विविधा-सादिसपर्यवसानेति, सोऽंशो भावितः, स्थितिरेव सादिरपर्यवसानेति योऽंशः स(तं) भावयति अनेन-'सम्यग्दृष्टिः सादिरपर्यवसाना सयोग' इत्यादिना, सह योगैः-मनोवाक्कायलक्षणैः सयोगः केवली, उत्पन्ने केवलज्ञाने यावत् शैलेशीं न प्रतिपद्यते तावत् सयोगकेवली, शैलेशीप्रतिपत्तौ तु निरुद्धयोगः, एतदेवाह-'शैलेशीप्राप्त' इति, शिलानां समूहाः शैलास्तेषामीशो मेरुः तस्य भावः शैलेशी, अचलतेतियावत्, तां प्राप्तः, स चेयान् कालो ज्ञेयः-मध्यमया वृत्त्या पञ्च ह्रस्वाक्षराण्युच्चार्यन्ते यावत्, ततः परं सिद्ध्यत्येव, एष द्विविधोऽपि केवली सयोगायोगाख्यः, भवस्थः सद्यपर्यवसानसम्यग्दृष्टिरुच्यते,

सिद्धश्च सर्वकर्मवियुत इति, यतः सादिरप्यसौ रुचिः न च कदाचिद-पैष्यतीति, सम्यग्दृष्टिः सादिरपर्यवसानेति चेत्ययं स्त्रीलिङ्गनिर्देशः भवस्थकेवलिनः सयोगस्यायोगस्य च सिद्धस्य च तस्य रुचेरनन्यत्व-ख्यापनार्थो, नासौ ततोऽन्येति, अथवा सम्यग्दृष्टिः सादिरपर्यवसाना याऽभिहिता तामनुभवति सयोगादिरिति ५।

सम्प्रति विधानद्वारं परामृशन्नाह-'विधान'मिति, विधीयते तदिति विधानं-भेदः प्रकार इति, ननु च साधनद्वारैरभिहित एव भेदो निसर्गसम्यग्दर्शनमधिगमसम्यग्दर्शनमिति, किं पुनर्भेद आख्यायते ?, उच्यते, तत्र न सम्यग्दर्शनस्य भेदः प्रतिपिपादयिषितः, किन्तु निमित्तं, तत्र क्षयादि यदुत्पत्तौ कारणतां प्रतिपद्यते तद्भेदो विवक्षितः, इह तु तेन निमित्तेन यत्कार्यमुपजनितं तस्य भेदः प्रतिपाद्यते, एवं च कृत्वा वक्ष्यमाणसङ्ख्याद्वारस्यास्य च विधानद्वारस्य (साधनस्य) च स्पष्ट एव भेदो निदर्शितः स्यात्, विधानं सम्यग्दर्शनस्य भेदकं क्षयसम्यग्दर्शन-मुपशमसम्यग्दर्शनं क्षयोपशमसम्यग्दर्शनमिति, सङ्ख्याद्वारे तु तद्वतां भेदः प्रतिपाद्यते, कियत् सम्यग्दर्शनं ?, कियन्तः सम्यग्दर्शनिन इत्यर्थः, निर्णयवाक्येऽपि चासङ्ख्येयानि सम्यग्दर्शनानीत्यस्मिन् असङ्ख्येयाः सम्यग्दर्शनिन इत्यर्थः, मतुपो लोपादभेदोपचारात् अर्शादिपाठाद्वा, तस्माद् युक्तः त्रयाणां साधनविधानसङ्ख्याद्वाराणां परस्परेण भेद इति,

सम्प्रति भेदकथने प्रवर्त्तमान एकस्याश्चाभेदरुचेरयुक्तरूपे(क्ता भिन्नते)ति मन्यमानः कारणौपाधिकं भेदं दर्शयन्नाह-'हेतुत्रैविध्यात् क्षयादि त्रिविध'मित्यादि, तिस्रो विधा यस्य स त्रिविधो हेतुः, अन्यपदार्थः, त्रिविधस्य भावः त्रैविध्यं, हेतोस्त्रैविध्यं हेतुत्रैविध्यं तस्माद्धेतुत्रैविध्यात्, वर्त्तमानसामीप्यादिवत् समासः, हेतुत्रैविध्यप्रदर्शनायाह-'क्षयादि त्रिविधं सम्यग्दर्शन'मिति कार्यनिर्देशः एषः, न च त्रिभिः सम्भूयैकं जन्यते मृदुदकगोमयैरिवोपदेशनकं, किन्तु क्षयेणान्यैव रुचिरात्यन्तिकी

सकलदोषरहिताऽऽविर्भाव्यते, क्षयोपशमेनापि चान्यादृश्येव, तथोपशमेनेति, अतः त्रिविधं सम्यग्दर्शनं यत् कार्यं क्षयादिहेतुभिः, के पुनस्ते हेतवः ? इति, उच्यते, क्षयादयः, कस्य च क्षयादयोऽत आह-'तदावरणीयस्ये'त्यादि, तस्य-सम्यग्दर्शनस्यावरणीयम्-आच्छादकं शशिलाञ्छनस्येवाभ्रादि तस्य, 'कर्मण'इति पृथग्भूतस्य कर्मणो, न वासनादेः, एतदेव स्पष्टयन्नाह-'दर्शनमोहस्ये'ति, अनन्तानुबन्ध्यादेर्दर्शनसप्तकस्येत्यर्थः, चशब्दः शेषप्रकृत्यानुगुण्यसमुच्चयार्थः, अवधारणार्थ इत्यन्ये, दर्शनमोहस्यैव न पठन्त्येवान्ये, ततश्च तदावरणीयस्य कर्म्मणो दर्शनमोहस्य 'क्षयादिभ्य' इति क्षयक्षयोपशमोपशमेभ्यस्तद्भवति, 'तद्यथे'त्युदाहरणोपन्यासार्थः, 'क्षयसम्यग्दर्शन'मित्यादि, तदावरणीयस्य कर्म्मणः क्षयादेरुपजातत्वादेवमभिधीयत इति भावः, 'अत्र चे'त्यादि, अत्रेति एषु क्षयादिसम्यग्दर्शनेषु यथा कार्यभेदोऽभ्युपगतः एवं प्रकर्षभेदोऽभ्युपगन्तव्य इति कथयत्येतच्चशब्दः, तं च प्रकर्षं दर्शयन्नाह-'औपशमिके'त्यादि, पूर्वं च क्षयसम्यग्दर्शनं प्रधानत्वादुपन्यस्येदानीं प्रकर्षस्य निदर्शयत्वादन्ते तदुपन्यस्यति, उपशमेन-उदयविघातरूपेण निर्वृत्तमौपशमिकं, क्षयेण-परिशाटरूपेणोपशमेन च निर्वृत्तं क्षायोपशमिकं, क्षयेण निर्वृत्तं क्षायिकम्, अत एषामौपशमिकादीनामिमां रचनामाश्रित्य परस्परस्य विशुद्धिप्रकर्षो-निर्म्मलता स्वच्छता तत्त्वपरिच्छेदितेत्यर्थः, औपशमिकं हि सम्यग्दर्शनं सर्वमलीमसमल्पकालत्वात्, भूयश्च मिथ्यात्वगमात्, यतोऽन्तर्मुहूर्त्तमात्रं भवेद्, यदि च कालं तत्रस्थो न करोति, एवं सति मिथ्यादर्शनमेव प्रतिपद्यत इत्यागमः, तस्माच्चौपशमिकात् क्षायोपशमिकं सम्यग्दर्शनं विशुद्धतरं, बहुकालावस्थायित्वाद्, यत उत्कृष्टेन षट्षष्टिः सागरोपमाणि साधिकानि तदुक्तम्, अत एव च तस्य वस्तुपरिच्छेदस्पष्टग्रहणसामर्थ्यमनुमातव्यम्, आगमाच्चास्मात्, ततश्च क्षायिकं विशुद्धतमं, सर्वकालावस्थायित्वात् स्पष्टवस्तुपरिच्छेदाच्चेति ॥१-७॥

ટીકાર્થ– કેવળ નિર્દેશ આદિને જ કહે છે એમ નહિ, કિંતુ સંબંધવાળા વાક્યનું પણ સમર્થન કરે છે. एभिश्च ઇત્યાદિ, આ નિર્દેશ આદિથી અને च શબ્દથી પ્રમાણ, નય, सत् આદિથી તત્ત્વોનો વિસ્તારથી બોધ થાય છે. एभिश्च(=એમનાથી) એમ સામાન્ય શબ્દનો નિર્દેશ કરવામાં વિશેષનો બોધ ન થાય. આથી વિશેષ અર્થ માટે કહે છે- निर्देशादिभिः इति, નિર્દેશાદિ શબ્દથી સામાન્ય સ્વરૂપ કહેવા છતાં નિયતસંખ્યાનું જ્ઞાન થતું નથી. સમાસમાં કથન અસ્પષ્ટ જ હોય એ પ્રસિદ્ધ છે. (એથી) સૂત્રથી પણ નિયતસંખ્યાની સંભાવના થઇ શકતી નથી. આથી षड्भिः એમ કહ્યું. षड्भिः એમ કહેવા છતાં શું આ છ વ્યાખ્યાના દ્વારો છે કે નહિ એવી જે આશંકા તેને દૂર કરવા માટે કહે છે- अनुयोगद्वारैः આ છ વ્યાખ્યાના દ્વારો(=ઉપાયો) છે, અર્થાત્ વ્યાખ્યાના અન્ય પ્રકારો છે. આ અનુયોગદ્વારો બધાં જ તત્ત્વોનાં છે કે નહિ ? એવી આશંકાને દૂર કરવા માટે કહે છે- 'सर्वेषाम्' इति, બધાય તત્ત્વોના અનુયોગદ્વારો છે. 'બધાયના' એમ કહેવા છતાં સર્વ શબ્દથી ભાવનું ગ્રહણ કર્યું નથી. તેથી તેનું નિરાકરણ કરવાની ઇચ્છાથી કહે છે- 'भावानाम्' इति, અભાવમાં પ્રયત્ન કરવો એ વ્યર્થ છે. આથી આ વિવરણ અભાવ સંબંધી નથી એમ કહે છે. ભાવો પણ અન્યદર્શનોને અભિમત છે, પણ અતત્ત્વ રૂપ છે. આથી जीवानां तत्त्वानाम् એ બે વિશેષણોનો ઉલ્લેખ કર્યો છે. નિર્દેશ આદિથી જીવાદિ તત્ત્વોનું નિરૂપણ સંક્ષેપથી છે કે વિસ્તારથી છે ? એવા પ્રશ્નના ઉત્તરમાં કહે છે- 'विकल्पशः' इति, शस् પ્રત્યય બધા કારકમાં લાગે છે. અહીં ત્રીજી વિભક્તિમાં છે, અર્થાત્ વિવિધ રીતે. विस्तरेण એવા પદથી આને કહે છે, અર્થાત્ વિવિધ રીતે વિસ્તારથી જીવાદિ તત્ત્વોનો બોધ થાય છે.

નિર્દેશ આદિ છ દ્વારોથી તત્ત્વોનો બોધ

નિર્દેશાદિ છ અનુયોગદ્વારોથી ભાવસ્વરૂપ જીવાદિ સર્વ તત્ત્વોનો વિવિધ રીતે વિસ્તારથી એમ કહેવા છતાં જો પૂર્વસૂત્રથી અધિગમ એ પદની અનુવૃત્તિ ન હોય તો વાક્ય અધૂરું જ રહે. આથી પૂર્વસૂત્રથી અધિગમપદની અનુવૃત્તિ હોવાથી કહે છે- "अधिगमः" इति. પદાર્થ સત્તા વિના હોતો નથી,

અર્થાત્ દરેક પદાર્થની સત્તા અવશ્ય હોય છે, તો પણ બીજી ક્રિયાનો અધ્યાહાર ન કરવો જોઈએ. તેથી भवति એ પ્રમાણે કહે છે.

આટલા વર્ણનથી સૂત્રના સમુદિત અર્થનું વ્યાખ્યાન કર્યું. હવે સૂત્રના અવયવાર્થનું વ્યાખ્યાન કરતાં ભાષ્યકાર કહે છે- 'तद्यथा' ઇત્યાદિ, નિર્દેશ વગેરે વ્યાખ્યાદ્વારો જે રીતે વિચારાય છે તે રીતે કહેવાય છે.

(૧) **નિર્દેશ–** નિર્દેશ એ પદ વ્યાખ્યાન કરવા યોગ્ય અવયવનો ઉલ્લેખ છે. [૧]નિર્દેશ ઉદ્દેશ પૂર્વક હોય છે. આથી પ્રશ્ન થાય તો નિર્દેશ ઘટે. આથી નિર્દેશનું વ્યાખ્યાન કરવાની ઇચ્છાથી જ ભાષ્યકાર ઉદ્દેશને કહે છે- **को जीवः** इति, જીવ શું દ્રવ્ય છે ? ગુણ છે ? ક્રિયા છે ? એવો પ્રશ્ન થયે છતે નિર્દેશને કહે છે- औपशमिकादि ઇત્યાદિ, હવે કહેવાશે તે ઔપશમિક વગેરે ભાવો છે. કેમકે આત્મા તે પ્રમાણે (ઉપશમ આદિ રૂપે) થાય છે. ઔપશમિક આદિ ભાવોથી યુક્ત જીવ દ્રવ્ય છે. જીવમાત્ર દ્રવ્ય જ છે એમ નહિ, તથા કેવળ ભાવસ્વરૂપ પણ નથી, કિંતુ દ્રવ્ય અને ભાવ એમ ઉભયસ્વરૂપ છે, અર્થાત્ જીવ દ્રવ્ય છે અને ઔપશમિક આદિ ભાવોથી યુક્ત પણ છે. આ રીતે જ જીવમાં સ્વામિત્વ વગેરે અનુયોગદ્વારો વિચારવા યોગ્ય છે. આથી ભાષ્યકારે જીવમાં સ્વામિત્વ વગેરે અનુયોગદ્વારો બતાવ્યા નથી. પણ અમે બતાવીએ છીએ.

(૨) **સ્વામિત્વ–** સ્વામી એટલે માલિક. સ્વામીનો ભાવ તે સ્વામિત્વ. જીવ કોનો સ્વામી છે ? અથવા જીવના કોણ સ્વામી છે ? એવા પ્રશ્નનો ઉત્તર કહેવાય છે- પ્રસ્તુત એક જીવ ધર્મ વગેરે અસ્તિકાયોનો સ્વામી છે. કારણ કે જીવ બધામાં મૂર્છા કરે છે, બધાને પ્રાપ્ત કરે છે, બધાનો પરિભોગ કરે છે, અથવા બધાને શરીરરૂપે ગ્રહણ કરે છે, આથી જીવ બધાનો સ્વામી છે. જીવના પણ તેના પ્રત્યે મૂર્છા કરનારા જીવો સ્વામી થાય છે.

---

૧. નિર્દેશ એટલે વસ્તુનું વિશેષથી વર્ણન કરવું. ઉદ્દેશ શબ્દના કેવળ નામથી ઉલ્લેખ કરવો, પ્રશ્ન કરવો વગેરે અનેક અર્થો છે. તેમાં અહીં ઉદ્દેશ શબ્દ પ્રશ્ન અર્થમાં છે. ઉદ્દેશને કહે છે એટલે પ્રશ્નને કહે છે.

(૩) **સાધન–** જેનાથી જીવ સિદ્ધ કરાય તે સાધન. જીવ કોનાથી સિદ્ધ કરાય છે ? એવા પ્રશ્નનો ઉત્તર કહેવાય છે- જીવ બીજા વડે સિદ્ધ કરાતો નથી. કારણ કે સદાય રહેલો છે. અથવા બાહ્ય (કર્મરૂપ) પુદ્ગલોની અપેક્ષાએ દેવ આદિ જીવ પુદ્ગલોથી સિદ્ધ કરાય છે, અર્થાત્ પુદ્ગલો વડે જીવ સ્વસ્થાને લઈ જવાય છે.

(૪) **અધિકરણ–** અધિકરણ એટલે આધાર. આત્મા શેમાં રહે છે ? નિશ્ચયનયથી આત્મા આત્મામાં રહે છે. કારણ કે પોતાનામાં રહેલો છે. વ્યવહારનયની અપેક્ષાએ આત્મા શરીર-આકાશ આદિમાં રહેલો છે. આત્મા શરીર આદિમાં રહેવા છતાં પોતાના સ્વરૂપથી રહિત બનતો નથી.

(૫) **સ્થિતિ–** આત્મા જીવસ્વરૂપે કેટલો કાળ રહે છે ? ભવચક્રની અપેક્ષાએ સર્વકાળે જીવસ્વરૂપે રહે છે. દેવાદિના ભવોને આશ્રયીને જ્યાં જેટલી આયુષ્યની સ્થિતિ હોય ત્યાં તેટલો કાળ રહે છે.

(૬) **વિધાન–** વિધાન એટલે પ્રકાર. જીવો કેટલા પ્રકારના છે ? જીવના ત્રસ-સ્થાવર આદિ ભેદો છે, એ પ્રમાણે બાકીના ભેદો પણ સિદ્ધાંતને અનુસરનારી બુદ્ધિથી પરમ ઋષિઓના પ્રવચનને જોઈને કહેવા. ગ્રંથ ગૌરવના ભયથી ભાષ્યકારે બતાવ્યા નથી.

સમ્યગ્દર્શનમાં નિર્દેશ આદિ દ્વારોથી વિચારણા

(૧) **નિર્દેશ–** તથા જેના માટે (સમ્યગ્દર્શનાદિ માટે) શાસ્ત્રની પ્રવૃત્તિ છે તેમાં (સમ્યગ્દર્શનાદિમાં) પણ નિર્દેશ આદિની યોજનાને કરતા ભાષ્યકાર કહે છે - 'સમ્યગ્દર્શનપરીક્ષાયામ્' ઇત્યાદિ, જ્યારે સમ્યગ્દર્શનનું નિરીક્ષણ કરાય છે ત્યારે પણ સમ્યગ્દર્શન શું ગુણ છે ? શું ક્રિયા છે ? શું દ્રવ્ય છે ? એમ પ્રશ્ન કર્યે છતે નિર્દેશો થાય છે. અહીં ઉત્તર કહેવાય છે- સમ્યગ્દર્શન દ્રવ્ય છે.

પ્રશ્ન– કેવી રીતે ?

ઉત્તર– જીવવડે શુભાધ્યવસાય વિશેષથી જે પુદ્ગલો વિશુદ્ધ કરીને દરેક સમયે ભોગવાય છે તે (કર્મના) પુદ્ગલો સમ્યગ્દર્શનનું નિમિત્ત છે.

કેમકે તત્ત્વભૂત પદાર્થોની શ્રદ્ધાનો પરિણામ તે પુદ્ગલોની સહાયથી થાય છે. તેથી કારણમાં કાર્યનો ઉપચાર કરવાથી સમ્યગ્દર્શન દ્રવ્ય છે. મુખ્યવૃત્તિથી તો સમ્યગ્દર્શન તત્ત્વભૂત પદાર્થોની શ્રદ્ધારૂપ આત્મપરિણામ છે. તે આત્મપરિણામ પણ આત્માથી ભિન્ન નથી. આથી સમ્યગ્દર્શન દ્રવ્ય છે એમ કહ્યું છે.

જો યથોક્ત પુદ્ગલો કે પુદ્ગલોની સહાયથી ઉત્પન્ન થયેલ આત્મપરિણામ સમ્યગ્દર્શન છે તો જેમનું દર્શનમોહનીય ક્ષીણ થયું છે તે છદ્મસ્થ, કેવલી અને સિદ્ધજીવને સમ્યગ્દર્શન ન હોય એમ કહ્યે છતે ભાષ્યકાર કહે છે-सम्यग्दृष्टिर्जीवः इति, સમ્યગ્ એટલે શુભ(=સુંદર). શુભ એટલે સર્વ પદાર્થો સત્-અસત્ રૂપ છે એમ જોનારી, જેના દર્શનમોહનીયનો ક્ષય થઇ ગયો છે એવા જે જીવની દૃષ્ટિ શુભ છે તે સમ્યગ્દૃષ્ટિ.

અહીં ભાવાર્થ આ પ્રમાણે છે- દર્શનમોહનીય કર્મ ક્ષીણ થયે છતે જીવ સમ્યગ્દર્શની નથી કહેવાતો, કિંતુ સમ્યગ્દૃષ્ટિ જ કહેવાય છે. (સમ્યગ્દર્શન જેને હોય તે સમ્યગ્દર્શની. આ વ્યાખ્યા પ્રમાણે ક્ષીણ દર્શનમોહનીય જીવમાં સમ્યગ્દર્શન ન હોય. પણ સમ્યગ્ છે દૃષ્ટિ જેની એવી વ્યાખ્યાના આધારે સમ્યગ્દર્શન હોય. કેમકે દૃષ્ટિ અને દર્શન એ બંને શબ્દનો અર્થ એક જ છે. આથી સમ્યગ્દર્શની શબ્દ અને સમ્યગ્દૃષ્ટિ શબ્દમાં માત્ર વ્યુત્પત્તિનો ભેદ છે. પદાર્થમાં ભેદ નથી.) આથી પૂર્વપક્ષીના કથનમાં સિદ્ધસાધ્યતા છે. (જે સિદ્ધ થયેલું હોય એને સિદ્ધ કરવાનો પ્રયત્ન કરવો તે ન્યાયશાસ્ત્ર પ્રમાણે સિદ્ધસાધ્યતા નામનો દોષ છે.)

ક્ષીણ દર્શનમોહ જીવ શું રૂપી છે ? ના, એમ ઉત્તર કહે છે- (રૂપી નથી) અરૂપી છે.

જેને રૂપ ન હોય તે અરૂપી. આ પ્રમાણે સર્વ (રસ-ગંધ-સ્પર્શ આદિ) ધર્મ [1]આદિમાં પ્રશ્નોત્તરી કરવી અને (રસ આદિનો) નિષેધ કરવો. આત્મા રૂપ આદિ ધર્મથી યુક્ત નથી. આત્મા અરૂપી છે. જો કે છદ્મસ્થ

૧. આદિ શબ્દથી પર્યાયો સમજવા.

અને કેવળી જીવોને કર્મસમૂહનો [૧]ઉપરાગ હોય તો પણ આત્મા સ્વભાવને છોડતો નથી. જેમ વાદળ વગેરે ચંદ્રને મલિન કરી શકે નહિ તેમ આગંતુક કર્મરજ આત્માને મલિન કરી શકતી નથી. સિદ્ધો તો સર્વથા અરૂપી જ છે.

તે જ સમ્યગ્દષ્ટિ હમણાં આશંકા કરાય છે કે તે સ્કંધ છે ? ગ્રામ છે ? તેના નિરાકરણ માટે કહે છે- સમ્યગ્દષ્ટિ રૂપરહિત હોવાથી જ પુદ્ગલાદિ સ્વરૂપ સ્કંધ નથી. આત્માના પ્રદેશોની અપેક્ષાએ સ્કંધ રૂપ છે અથવા સમુદિત પાંચ અસ્તિકાય સ્કંધ છે. નો શબ્દ દેશ વાચી હોવાથી સમ્યગ્દષ્ટિ નોસ્કંધ છે. (કારણ કે સમ્યગ્દષ્ટિ જીવ પંચાસ્તિકાય રૂપ સ્કંધના એક દેશ રૂપ છે, અર્થાત્ પાંચ સ્કંધમાનો એક સ્કંધ છે). એ પ્રમાણે નોગ્રામ અંગે પણ કહેવું, અર્થાત્ સમ્યગ્દષ્ટિ જીવ નોગ્રામ છે. (કેમકે સમ્યગ્દષ્ટિ [૨]ચૌદભૂતગ્રામના એક દેશરૂપ છે, અર્થાત્ ચૌદભૂતગ્રામમાનો એક સંજ્ઞી પંચેન્દ્રિય ગ્રામ છે.)

(૨) **સ્વામિત્વ–** હવે સ્વામિત્વ એવા શબ્દોચ્ચારમાં રહેલા સ્વામી એવા શબ્દથી સમ્યગ્દર્શન કયા સ્વામીનું છે ? એવું ઉદ્દેશવાક્ય કરીને પ્રશ્ન થાય કે પ્રવર્તેલું(=થયેલું) સમ્યગ્દર્શન શું જેમાં [૩]સમવાય(=અભેદ) સંબંધથી રહેલું છે તેનું જ થાય કે વ્યવહારથી સમ્યગ્દર્શનની ઉત્પત્તિમાં નિમિત્ત બનનાર અન્યનું પણ થાય ? આ પ્રશ્નનો ઉત્તર કહેવાય છે- મુખ્યવૃત્તિથી તો જે સમ્યગ્દર્શન જેમાં સમવાય સંબંધથી રહેલું છે તે સમ્યગ્દર્શન તેનું જ છે. વ્યવહારથી ઉત્પત્તિમાં નિમિત્ત બનનારનું પણ

૧. એક વસ્તુના ગુણો બીજી વસ્તુમાં આવે તે ઉપરાગ કહેવાય. જેમકે સ્ફટિકની પાસે લાલ પુષ્પ મૂકવામાં આવે તો સ્ફટિકમાં થયેલ લાલરંગ ઉપરાગ છે.

૨. ચૌદભૂતગ્રામ– એકેન્દ્રિયસૂક્ષ્મ-બાદર, બેઇન્દ્રિય, ત્રેઇન્દ્રિય, ચઉરિન્દ્રિય, અસંજ્ઞી પંચેન્દ્રિય, સંજ્ઞી પંચેન્દ્રિય આ સાતેય પર્યાપ્તા અને અપર્યાપ્તા=૧૪.

૩. સમવાયસંબંધ એટલે અભેદ સંબંધ. જેમકે સમ્યગ્દર્શનાદિ ગુણો આત્મામાં સમવાય સંબંધથી રહેલા હોવાથી આત્મા અને ગુણો એ બંનેનો અભેદ સંબંધ છે. બંનેને એકબીજાથી જુદા ન કરી શકાય. સંયોગસંબંધ એટલે ભેદ સંબંધ. જેમ કે વૃક્ષ ઉપર બેઠેલા વાનરનો વૃક્ષની સાથે સંયોગ સંબંધ છે. આથી તે બંને જુદા કરી શકાય છે. એમ સોય-દોરો, આત્મ-કર્મ વગેરે સંબંધમાં પણ જાણવું.

થાય. આને જ ભાષ્યકાર કહે છે- આત્મસંયોગેન ઇત્યાદિ, આત્મસંયોગથી એટલે આત્મસંબંધથી. જ્યારે પર પ્રતિમાદિ રૂપ નિમિત્તથી સમ્યગ્દર્શન ઉત્પન્ન થતું હોય ત્યારે પ્રતિમાદિની અપેક્ષા ન કરવામાં આવે તો એ (સમ્યગ્દર્શનનો) પરિણામ આત્મામાં સમવાય(=અભેદ) સંબંધથી રહ્યો છે. આથી તે જ આત્મા તેવા પરિણામના કારણે તે જીવાદિ તત્ત્વો આ પ્રમાણે જ છે એમ માને. આથી આત્મસંબંધથી સમ્યગ્દર્શન જીવનું છે. તત્ત્વોની રુચિરૂપ સમ્યગ્દર્શનનો સ્વામી જીવ છે. 'परसंयोगेन' इति, પર સાધુ કે પ્રતિમાદિ વસ્તુના નિમિત્તથી શ્રદ્ધાનો પરિણામ થાય તેથી તે પરિણામના કર્તા સાધુ કે પ્રતિમાદિ છે. એથી તે સમ્યગ્દર્શન સાધુ કે પ્રતિમાદિ પરવસ્તુનું કહેવાય છે. અહીં પરસંયોગમાં જીવનું ઇત્યાદિ છ વિકલ્પો થાય છે. તે આ પ્રમાણે - (૧) જીવનું, (૨) અજીવનું, (૩) બે જીવનું, (૪) બે અજીવનું, (૫) ઘણા જીવોનું અને (૬) ઘણા અજીવોનું.

જીવનું વગેરે છ વિકલ્પો

જીવનું– દ્રવ્ય, ક્ષેત્ર, કાળ, ભાવ, ભવ એમ પાંચ નિમિત્તોને આશ્રયીને કર્મનો ક્ષયોપશમ થાય છે. જીવને ક્રિયાનુષ્ઠાનથી યુક્ત મુનિનું આલંબન કરીને તત્ત્વરુચિ ઉત્પન્ન થાય તો તે તત્ત્વરુચિ ઉત્પન્ન કરનાર બહાર રહેલા સાધુની કહેવાય છે. જેમકે, ઘડો (स्वं=)પોતાનો (=માટીનો) હોવા છતાં તેના બનાવનાર કુંભારનો કહેવાય છે.

અજીવનું– એ પ્રમાણે જ્યારે પ્રતિમા વગેરે અજીવ પદાર્થના આલંબનથી ક્ષયોપશમ થાય ત્યારે તે અજીવનું જ સમ્યગ્દર્શન છે, આત્માનું નહિ.

બે જીવોનું– ક્ષયોપશમના નિમિત્ત તરીકે બે સાધુઓ વિવક્ષિત હોય, આત્મા નહિ, ત્યારે બે જીવોનું સમ્યગ્દર્શન છે.

બે અજીવોનું– જ્યારે બે પ્રતિમા રૂપ બે અજીવ નિમિત્ત કર્યા હોય ત્યારે સ્વામિત્વની વિવક્ષામાં તે સમ્યગ્દર્શન બે અજીવોનું છે.

ઘણા જીવોનું– જ્યારે ઘણા=સાધુઓ રૂપ જીવો સમ્યગ્દર્શનની ઉત્પત્તિમાં નિમિત્ત બને ત્યારે ઘણા જીવોનું સમ્યગ્દર્શન છે, નહિ કે જેમાં સમવાય સંબંધથી રહ્યું છે તે જીવનું.

ઘણા અજીવોનું– જ્યારે ભગવાનની ઘણી પ્રતિમાઓ જોઈને તત્ત્વભૂત પદાર્થોની શ્રદ્ધા પ્રગટ થાય ત્યારે પ્રતિમાઓ જ તે સમ્યગ્દર્શનને કરનારી હોવાથી તે સમ્યગ્દર્શન પ્રતિમાઓનું(=ઘણા અજીવોનું) જ છે, આત્માનું નહિ.

ઉભયસંયોગેન ઇતિ, જ્યારે સમ્યગ્દર્શન અંતરંગ એવા આત્માનું અને બહિરંગ એવા સાધુનું છે એમ વિવક્ષા કરવામાં આવે ત્યારે તે બંને સમ્યગ્દર્શનના સ્વામી થાય છે. આથી ઉભયસંયોગ કહેવાય છે.

અસંભવિત છ વિકલ્પો

અહીં લાઘવિક(=થોડા શબ્દોમાં ઘણું કહેવામાં સમર્થ) આચાર્ય હેય(=તજવા યોગ્ય) વિકલ્પોને બતાવે છે, અર્થાત્ સંભવી ન શકે તેવા વિકલ્પોને બતાવે છે. હેય તરીકે ગ્રહણ કરેલા વિકલ્પો સિવાયના વિકલ્પો આદેય(=સ્વીકારવા યોગ્ય) છે, અર્થાત્ સંભવી શકે તેવા છે.

જીવનું– અહીં(=ઉભય સંયોગમાં) જીવનું સમ્યગ્દર્શન એ વિકલ્પ સંભવતો નથી. કારણ કે જેના અંતે છઠ્ઠી વિભક્તિ છે એવા જીવ શબ્દથી સમ્યગ્દર્શનના સમવાય સંબંધવાળો આત્મા કહેવાય છે ? (=ગ્રહણ કરાય છે ?) કે જેને જોઈને તેવો પરિણામવિશેષ ઉત્પન્ન થયો તે બાહ્ય તીર્થંકર વગેરે કહેવાય છે ? તેમાં જો સમવાય સંબંધવાળા આત્માનો સંબંધ કરાય છે તો પરનો સંબંધ નથી. (આથી ઉભયસંયોગ નથી.) આ ઉભયસંયોગથી વિચારાય છે અથવા જો તીર્થંકર આદિની સાથે સમ્યગ્દર્શનનો સંબંધ કરાય છે તો આત્માની સાથે સંબંધ નથી. આથી આ વિકલ્પ તજવા યોગ્ય જ છે.

અજીવનું– એક પ્રતિમા વિવક્ષિત હોવાથી ઉભયસંયોગનો અભાવ છે. એથી આ વિકલ્પ હેય=ત્યાજ્ય છે.

બે જીવનું– બે જીવોનું સમ્યગ્દર્શન એ વિકલ્પ ન સંભવે. કારણ કે મારું સમ્યગ્દર્શન ઉત્પન્ન થયું અને આનું સમ્યગ્દર્શન ઉત્પન્ન થયું એમ સમ્યગ્દર્શનની સાથે સમવાય સંબંધવાળા બે પુરુષો સ્વામી તરીકે વિવક્ષિત છે. આમાં જેના આલંબનથી સમ્યગ્દર્શન ઉત્પન્ન થયું. તેની સ્વામી તરીકે વિવક્ષા કરી નથી. અહીં ઉત્પત્તિ(=ઉપાદાન) અને નિમિત્ત એ ઉભયનો સંયોગ વિવક્ષિત છે. આથી આ વિકલ્પનો ત્યાગ કરવામાં આવે છે.

બે અજીવોનું– બે અજીવોનું સમ્યગ્દર્શન એ વિકલ્પમાં આલંબન કરાયેલી બે પ્રતિમાઓનું ભેદથી સમ્યગ્દર્શન વિવક્ષિત છે, પણ જેમાં સમ્યગ્દર્શન સમવાય સંબંધથી રહેલું છે તેની વિવક્ષા નથી. આથી આ વિકલ્પ પણ તજવામાં આવે છે.

જીવોનું– તથા જીવોનું સમ્યગ્દર્શન એ પાંચમો વિકલ્પ પણ તજવા યોગ્ય છે. આમાં આનું સમ્યગ્દર્શન, આનું સમ્યગ્દર્શન અને આનું સમ્યગ્દર્શન એમ સમ્યગ્દર્શનના સમવાય સંબંધવાળા ઘણા જીવો વિવક્ષિત છે. જે આલંબનથી તેમને સમ્યગ્દર્શન થયું તેનું સમ્યગ્દર્શન વિવક્ષિત નથી તેથી આ વિકલ્પ પણ તજવા યોગ્ય છે.

અજીવોનું– અજીવોનું સમ્યગ્દર્શન એ છઠ્ઠો વિકલ્પ પણ તજવામાં આવે છે. આમાં આલંબન કરવા યોગ્ય ઘણી પ્રતિમાઓનું આ સમ્યગ્દર્શન વિવક્ષિત છે. જેનામાં સમ્યગ્દર્શન ઉત્પન્ન થયું તેનું સમ્યગ્દર્શન વિવક્ષિત નથી. એથી આ છઠ્ઠો વિકલ્પ તજવા યોગ્ય છે.

આ પ્રમાણે ઉભયસંયોગની વિવક્ષામાં આ છએ ભાંગા તજી દીધા.

સંભવિત છ વિકલ્પો

આદેય વિકલ્પો પણ છ જ છે તે આ પ્રમાણે- (૧) જીવનું-જીવનું, (૨) જીવનું-બે જીવોનું, (૩) જીવનું-ઘણા જીવોનું, (૪) જીવનું-અજીવનું, (૫) જીવનું-બે અજીવનું, (૬) જીવનું-ઘણાં અજીવોનું.

(૧) **જીવનું-જીવનું–** જેને સમ્યગ્દર્શન થયું, સમ્યગ્દર્શનના પરિણામવાળા તે જીવનું અને જે સાધુને નિમિત્ત કરીને સમ્યગ્દર્શન થાય તે જીવનું, એમ ઉભયની વિવક્ષા હોવાથી તત્ત્વથી તે વિકલ્પ સંભવે છે.

(૨) **જીવનું-બે જીવોનું–** જેને સમ્યગ્દર્શન થયું અને વિવક્ષિત કરાયું તે જીવનું, દર્શન કરાતા જે બે સાધુઓથી સમ્યગ્દર્શન ઉત્પન્ન કરાયું તે બે સાધુઓનું, તે સમ્યગ્દર્શનની બંને સ્થળે વિવક્ષા કરી હોવાથી જીવનું અને બે જીવોનું એવો બીજો વિકલ્પ છે.

(૩) **જીવનું-ઘણા જીવોનું–** જેને સમ્યગ્દર્શન થયું અને વિવક્ષિત કરાયું તે જીવનું, દર્શન કરાતા ઘણા સાધુઓથી સમ્યગ્દર્શન ઉત્પન્ન કરાયું તે ઘણા જીવોનું, તે સમ્યગ્દર્શનની બંને સ્થળે વિવક્ષા કરી હોવાથી જીવનું અને ઘણા જીવોનું એવો ત્રીજો વિકલ્પ છે.

(૪) **જીવનું-અજીવનું–** જેને સમ્યગ્દર્શન થયું અને વિવક્ષિત કરાયું તે જીવનું, દર્શન કરાતી અજીવરૂપ પ્રતિમાથી સમ્યગ્દર્શન ઉત્પન્ન કરાયું તેનું સમ્યગ્દર્શન, અહીં જીવનું અને પ્રતિમાનું સમ્યગ્દર્શન છે. આથી જીવનું-અજીવનું આ (ચોથો) વિકલ્પ સંભવે છે.

(૫) **જીવનું-બે અજીવોનું–** જે જીવને સમ્યગ્દર્શન ઉત્પન્ન થયું અને દર્શન કરાતી જે બે પ્રતિમાઓ વડે તે ઉત્પન્ન કરાયું આ બંનેની વિવક્ષા કરી હોવાથી જીવનું અને બે અજીવોનું એ (પાંચમો) વિકલ્પ સંભવે છે.

(૬) **જીવનું-ઘણા અજીવોનું–** જે જીવને સમ્યગ્દર્શન ઉત્પન્ન થયું અને દર્શન કરાતી જે ઘણી પ્રતિમાઓથી ઉત્પન્ન કરાયું, અહીં સર્વ સ્થળે વિવક્ષા કરી હોવાથી જીવનું અને ઘણા અજીવોનું એ (છઠ્ઠો) ભાંગો સંભવે છે.

આને ભાષ્યકાર કહે છે- શેષાઃ સન્તિ બાકીના(=અસંભવિત સિવાયના) છ વિકલ્પો છે=સંભવે છે.

(૩) **સાધન–** હવે ત્રીજા દ્વારની વિચારણા કરતા ભાષ્યકાર કહે છે- સાધનમ્ ઇતિ, વસ્તુ જેનાથી ઉત્પન્ન કરાય તે સાધન. અહીં જે પૂછાઇ રહ્યું છે તેને કહે છે- સમ્યગ્દર્શનં કેન ભવતિ ? સુવિશુદ્ધ સમ્યક્ત્વના

કર્મદલિકોથી(=સમ્યક્ત્વમોહનીયથી) યુક્ત (તત્ત્વભૂત પદાર્થોની) રુચિ કોનાથી થાય છે ? આથી ઉત્તર કહે છે- તે રુચિ નિસર્ગથી કે અધિગમથી થાય છે એમ પૂર્વે (અ.૧ સૂ.૩માં) કહ્યું છે.

અહીં વિશેષ કહે છે- કેવળ નિસર્ગ અને અધિગમ એ બે જ તેવા પ્રકારની રુચિને ઉત્પન્ન કરતા નથી, કિંતુ નિસર્ગ-અધિગમથી કર્મોનો ક્ષયોપશમ વગેરે ઉત્પન્ન કરાય છે. તે ક્ષયોપશમ આદિથી સમ્યગ્દર્શન થાય છે. તે નિસર્ગ-અધિગમ પણ કર્મના ક્ષયોપશમ આદિથી જ થાય છે. ઉત્તરોત્તર અધિક અધિક વિશુદ્ધ ક્ષયોપશમને ઉત્પન્ન કરનારા નિસર્ગ-અધિગમથી જ્યારે વિશિષ્ટ કોટિનો ક્ષયોપશમ ઉત્પન્ન કરાય છે ત્યારે તે વિશિષ્ટ કોટિના ક્ષયોપશમથી સમ્યગ્દર્શન થાય છે.

નિસર્ગ અંગે ઘણું કહેવાનું હોવાથી પૂર્વે (ત્રીજા સૂત્રમાં) નિસર્ગ અંગે જણાવી દીધું જ છે. તે સઘળું એક વાક્યથી જણાવવાનું શક્ય ન હોવાથી ભલામણ કરે છે- તેમાં નિસર્ગ પૂર્વે કહેલો છે. અધિગમમાં વિચારણા અલ્પ હોવાથી એક વાક્યથી અધિગમનો સંપૂર્ણ ઉપસંહાર થતો હોવાથી કહે છે- અધિગમસ્તુ સમ્યગ્ વ્યાયામઃ ઇતિ, અધિગમ એટલે સમ્યગ્ વ્યાયામ. ગુરુ આદિની પાસે રહેનારની સમ્યગ્દર્શન ઉત્પન્ન કરવામાં સમર્થ એવી શુભક્રિયા સમ્યગ્ વ્યાયામ કહેવાય છે.

ઉભયમપિ ઇતિ, નિસર્ગસમ્યગ્દર્શન અને અધિગમસમ્યગ્દર્શન એ બંનેય કેવી રીતે થાય છે એવા પ્રશ્નના ઉત્તરને કહે છે- 'તદાવરણીયસ્ય' ઇત્યાદિ, તત્ત્વભૂત પદાર્થોની શ્રદ્ધારૂપ સમ્યગ્દર્શનને રોકનાર જે અનંતાનુબંધી કષાય આદિ કર્મ, તે કર્મના ક્ષયથી, ઉપશમથી અને ક્ષયોપશમથી નિસર્ગ અને અધિગમ સમ્યગ્દર્શન થાય છે.

તદાવરણીય શબ્દનો અર્થ

પૂર્વપક્ષ– [1]ભાષ્યના તદાવરણીયસ્ય એવા શબ્દથી તત્ત્વાર્થશ્રદ્ધારૂપ

૧. આ પૂર્વપક્ષ શ્રી સિદ્ધસેન ગણિકૃત ટીકામાં પહેલા અધ્યાયના પહેલા સૂત્રમાં વિસ્તારથી જણાવ્યો છે અને સ્વપક્ષનું જુદી-જુદી યુક્તિઓથી સમર્થન કર્યું છે.

જ્ઞાનને રોકનાર કર્મ ગ્રહણ કરવા જોઈએ. કેમકે જ્ઞાનાવરણીય કર્મ સિવાય બીજા કોઇ કર્મમાં પ્રાયઃ આવરણીય એવા શબ્દનો પ્રયોગ થતો નથી. એથી જ દર્શન એ જ્ઞાન છે.

ઉત્તરપક્ષ– આ યુક્ત નથી. કારણ કે જ્ઞાનાવરણીયકર્મનો ઉપશમ થતો નથી.

પૂર્વપક્ષ– જ્ઞાનાવરણીયકર્મનો ઉપશમ થતો નથી એ સત્ય છે પણ અમારું એ કહેવું છે કે મોહનીયના ઉપશમથી જ્ઞાનાવરણીયનો જે ક્ષય વગેરે થાય તેનાથી સમ્યગ્દર્શન થાય.

ઉત્તરપક્ષ– આ પણ યુક્ત નથી. કારણ કે અન્યપક્ષ(=વિકલ્પ) તરીકે ઉપશમેન(=ઉપશમથી) એમ જે ઉલ્લેખ કર્યો છે તે ન ઘટી શકે. તથા હેતુનું કાર્યની પૂર્વે ગ્રહણ કરવામાં આવે છે. "તદાવરણીય" શબ્દથી જ્ઞાનાવરણીયકર્મને લેવામાં કાર્યની પૂર્વે હેતુ રહેતો નથી. પહેલા મોહનીયનો ઉપશમ (વગેરે) થાય. તેનાથી જ્ઞાનાવરણીયનો ક્ષય વગેરે થાય. તેનાથી સમ્યગ્દર્શન થાય. આમ કાર્ય જે સમ્યગ્દર્શન તેની પૂર્વે દર્શનમોહનો ઉપશમરૂપ હેતુ નથી. કાર્ય અને હેતુની વચ્ચે જ્ઞાનાવરણીયનો ક્ષય રહેલ છે, તથા અનિષ્ટ પ્રસંગરૂપ દોષ આવે છે.

તે આ રીતે - ક્યારેક સાતાવેદનીયના ઉદયથી પણ (=સાતાવેદનીયના ઉદયરૂપ નિમિત્તથી પણ) જ્ઞાનાવરણીય આદિનો ક્ષય થાય. તે જ્ઞાનાવરણીયનો ક્ષય વગેરે ઔદયિક ભાવથી થયો એમ માનવાનો પ્રસંગ આવે. આમ ઉક્ત કથનમાં કોઇ સાર નથી. તેથી તદાવરણીયમ્ એટલે સમ્યગ્દર્શનને રોકનારું કર્મ અને તે અનંતાનુબંધી આદિ જ છે. આમ માનવામાં કોઇ દોષ નથી.

અધિકરણના ત્રણ ભેદ

(૪) અધિકરણ– હવે અધિકરણ દ્વારને વિચારે છે- 'અધિકરણમ્' ઇતિ, જ્યાં રહેવાય તે અધિકરણ. અધિકરણ એટલે આધાર કે આશ્રય. સમ્યગ્દર્શનનો આધાર આત્મા, પર અને ઉભય એમ ત્રણ છે. મુખ્ય

આધાર સમ્યગ્દર્શન જેમાં સમવાય(=અભેદ) સંબંધથી રહ્યું છે તે આત્મા છે. ઉપચારથી(=વ્યવહારથી) સમ્યગ્દર્શન પરમાં હોય. સમ્યગ્દૃષ્ટિ જીવ જે અશ્વ આદિ ઉપર રહેલો છે તે અશ્વાદિમાં પણ સમ્યગ્દર્શન છે. આત્મા અને પર એમ ઉભયની વિવક્ષા કરવામાં આવે તો સમ્યગ્દર્શન આત્મામાં અને પરમાં એમ બંનેમાં રહેલું છે.

આ ત્રણ પ્રકારને જ બતાવવા ભાષ્યકાર કહે છે- आत्मसन्निधानेन इत्यादि, આત્મસંનિધાનથી સમ્યગ્દર્શન આત્મામાં જ રહેલું છે. પરસંનિધાનથી સમ્યગ્દર્શન બીજામાં રહેલું છે. આ વિકલ્પમાં સમ્યગ્દર્શન આત્મામાં રહેલું હોવા છતાં વિવક્ષિત કરાતું નથી. સંનિધાનથી આત્મામાં અને પરમાં એમ બંનેમાં રહેલું છે. આત્મસંનિધાન એ પદના અર્થને ભાષ્યકાર મિત્ર થઈને કહે છે- આત્મસંનિધાન એટલે અભ્યંતરસંનિધાન. આત્મા જ આધાર તે આત્મસંનિધાન. (અહીં સંનિધાન શબ્દનો આધાર અર્થ કર્યો છે તે ખ્યાલ રાખવાની જરૂર છે. એથી ત્રણ આધારનો સીધો અર્થ આત્માધાર, પરાધાર અને ઉભયાધાર એવો થાય.) આત્મસંનિધાનને અતિશય પ્રસિદ્ધ શબ્દથી અભ્યંતર સંનિધાન એમ કહ્યું છે. આંતર એટલે સમ્યગ્દર્શનની નજીક. (આથી આત્મસંનિધાન એટલે નજીક એવો આધાર. આત્મા અત્યંત નજીક છે. આથી આત્મસંનિધાન, અભ્યંતરસંનિધાન અને આસન્નસંનિધાન એ બધાનો એક જ અર્થ છે. આત્મા સમ્યગ્દર્શનનો નજીકનો આધાર છે.)

પરસંનિધાન એવા શબ્દના અર્થનું વિવરણ કરે છે- बाह्यसन्निधानम्, આસન વગેરે બાહ્ય છે. જ્યાં રહેલાને સમ્યગ્દર્શન થાય તે બાહ્યસંનિધાન છે. એ પ્રમાણે ઉભયની વિચારણા કરવી.

આત્મા જ દર્શન-જ્ઞાન-ચારિત્ર રૂપ છે

હવે ત્રણ પ્રકારના આધારનું વર્ણન કર્યે છતે બીજાને આ જ (=ત્રણ પ્રકારના આધારનું વર્ણન જ) સંદેહનું કારણ થયું કે- તો પછી સમ્યગ્દર્શન ક્યાં છે ? આથી પૂછે છે- कस्मिन् सम्यग्दर्शनम् ? સમ્યગ્દર્શન શેમાં છે ?

अत्राह- किमेते तन्त्रान्तरीया वादिन आहोस्वित्स्वतन्त्रा एव चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता इति । अत्रोच्यते- नैते तन्त्रान्तरीया, नापि स्वतन्त्रा मतिभेदेन विप्रधाविताः । ज्ञेयस्य त्वर्थस्याध्यवसायान्तराण्येतानि । तद्यथा- घट इत्युक्ते योऽसौ चेष्टाभिर्निर्वृत्त ऊर्ध्वकुण्डलौष्ठायतवृत्तग्रीवोऽधस्तात्परिमण्डलो जलादी-नामाहरणधारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो द्रव्यविशेषस्तस्मिन्नेक-स्मिन्विशेषवति तज्जातीयेषु वा सर्वेष्वविशेषात्परिज्ञानं नैगमनयः ॥ एकस्मिन्वा बहुषु वा नामादिविशेषितेषु साम्प्रतातीतानागतेषु घटेषु सम्प्रत्ययः सङ्ग्रहः । तेष्वेव लौकिकपरीक्षकग्राह्येषूपचारगम्येषु यथास्थूलार्थेषु संप्रत्ययो व्यवहारः । तेष्वेव सत्सु साम्प्रतेषु संप्रत्यय ऋजुसूत्रः । तेष्वेव साम्प्रतेषु नामादीनामन्यतमग्राहिषु प्रसिद्धपूर्वकेषु घटेषु सम्प्रत्ययः साम्प्रतः शब्दः । तेषामेव साम्प्रतानामध्यवसायासङ्क्रमो वितर्कध्यानवत् समभिरूढः । तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थ-ग्राहित्वमेवम्भूत इति ॥

अत्राह- एवमिदानीमेकस्मिन्नर्थेऽध्यवसायनानात्वान्ननु विप्रतिपत्ति-प्रसङ्ग इति । अत्रोच्यते- यथा सर्वमेकं सदविशेषात् । सर्वं द्वित्वं जीवाजीवात्मकत्वात् । सर्वं त्रित्वं द्रव्यगुणपर्यायावरोधात् । सर्वं चतुष्टयं चतुर्दर्शनविषयावरोधात् सर्वं पञ्चत्वमस्तिकायावरोधात् । सर्वं षट्त्वं षड्द्रव्यावरोधादिति । यथैता न विप्रतिपत्तयोऽथ चाध्यवसायस्थाना-न्तराण्येतानि तद्वन्नयवादा इति ॥ किञ्चान्यत् । यथा मतिज्ञानादिभिः पञ्चभिर्ज्ञानैर्धर्मादीनामस्तिकायानामन्यतमोऽर्थः पृथक् पृथुगुपलभ्यते,

पर्यायविशुद्धिविशेषादुत्कर्षेण, न च ता विप्रतिपत्तयः तद्वन्नयवादाः । यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः प्रमाणैरेकोऽर्थः प्रमीयते, स्वविषय-नियमात्, न च ता विप्रतिपत्तयो भवन्ति, तद्वन्नयवादा इति ।

आह च–

नैगमशब्दार्थानामेकानेकार्थनयगमापेक्षः ।

देशसमग्रग्राही व्यवहारी नैगमो ज्ञेयः ॥१॥

यत्सङ्गृहीतवचनं सामान्ये देशतोऽथ च विशेषे ।

तत्सङ्ग्रहनयनियतं ज्ञानं विद्यान्नयविधिज्ञः ॥२॥

समुदायव्यक्त्याकृतिसत्तासञ्ज्ञादिनिश्चयापेक्षम् ।

लोकोपचारनियतं व्यवहारं विस्तृतं विद्यात् ॥३॥

साम्प्रतविषयग्राहकमृजुसूत्रनयं समासतो विद्यात् ।

विद्याद्यथार्थशब्दं विशेषितपदं तु शब्दनयम् ॥४॥ इति ॥

अत्राह- अथ जीवो नोजीवः अजीवो नोअजीव इत्याकारिते केन नयेन कोऽर्थः प्रतीयत इति । अत्रोच्यते- जीव इत्याकारिते नैगमदेशसङ्ग्रहव्यवहारर्जुसूत्रसाम्प्रतसमभिरूढैः पञ्चस्वपि गतिष्वन्यतमो जीव इति प्रतीयते । कस्मात् । एते हि नया जीवं प्रत्यौप-शमिकादियुक्तभावग्राहिणः । नोजीव इत्यजीवद्रव्यं जीवस्य वा देशप्रदेशौ । अजीव इत्यजीवद्रव्यमेव । नोअजीव इति जीव एव, तस्य वा देशप्रदेशाविति । एवम्भूतनयेन तु जीव इत्याकारिते भवस्थो जीवः प्रतीयते । कस्मात् । एष हि नयो जीवं प्रत्यौदयिकभावग्राहक एव । जीवतीति जीवः प्राणिति प्राणान्धारयतीत्यर्थः । तच्च जीवनं सिद्धे न विद्यते तस्माद् भवस्थ एव जीव इति । नोजीव इत्यजीवद्रव्यं सिद्धो वा । अजीव इत्यजीवद्रव्यमेव । नोअजीव इति भवस्थ एव जीव इति । समग्रार्थग्राहित्वाच्चास्य नयस्य नानेन देशप्रदेशौ गृह्येते । एवं जीवौ

जीवा इति द्वित्वबहुत्वाकारितेष्वपि । सर्वसङ्ग्रहणे तु जीवो नोजीवः अजीवो नोअजीवः जीवौ नोजीवौ अजीवौ नोअजीवौ इत्येकद्वित्वाकारितेषु शून्यम् । कस्मात् । एष हि नयः सङ्ख्यानन्त्याज्जीवानां बहुत्वमेवेच्छति यथार्थग्राही । शेषास्तु नया जात्यपेक्षमेकस्मिन्बहुवचनत्वं बहुषु बहुवचनं सर्वाकारितग्राहिण इति । एवं सर्वभावेषु नयवादाधिगमः कार्यः ।

अत्राह- पञ्चानां ज्ञानानां सविपर्ययाणां कानि को नयः श्रयत इति । अत्रोच्यते- नैगमादयस्त्रयः सर्वाण्यष्टौ श्रयन्ते । ऋजुसूत्रनयो मतिज्ञान-मत्यज्ञानवर्जानि षट् ।

अत्राह- कस्मान्मतिं सविपर्ययां न श्रयत इति । अत्रोच्यते- श्रुतस्य सविपर्ययस्योपग्रहत्वात् । शब्दनयस्तु द्वे एव श्रुतज्ञानकेवलज्ञाने श्रयते ।

अत्राह- कस्मान्नेतराणि श्रयत इति । अत्रोच्यते- मत्यवधिमनःपर्यायाणां श्रुतस्यैवोपग्राहकत्वात् । चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां नास्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते । तस्मादपि विपर्ययान्न श्रयत इति । अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति । अत्राह च—

विज्ञायैकार्थपदान्यर्थपदानि च विधानमिष्टं च ।
विन्यस्य परिक्षेपान्नयैः परीक्ष्याणि तत्त्वानि ॥१॥

ज्ञानं सविपर्यासं त्रयः श्रयन्त्यादितो नयाः सर्वम् ।
सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यासः ॥२॥

ऋजुसूत्रः षट् श्रयते मतेः श्रुतोपग्रहादनन्यत्वात् ।
श्रुतकेवले तु शब्दः श्रयते नाऽन्यच्छ्रुताङ्गत्वात् ॥३॥

मिथ्यादृष्ट्यज्ञाने न श्रयते नास्य कश्चिदज्ञोऽस्ति ।
ज्ञस्वाभाव्याज्जीवो मिथ्यादृष्टिर्न चाप्यज्ञः ॥४॥

इति नयवादाश्चित्राः क्वचिद्विरुद्धा इवाथ च विशुद्धाः ।
लौकिकविषयातीतास्तत्त्वज्ञानार्थमधिगम्याः ॥५॥ ॥१-३५॥

इति तत्त्वार्थाधिगमसूत्रे स्वोपज्ञभाष्यसमेते प्रथमोऽध्यायः समाप्तः ॥

નૈગમ અને શબ્દનયના ભેદો

ભાષ્યાર્થ– સૂત્રમાં જણાવેલા ક્રમ પ્રમાણે આદ્ય શબ્દથી નૈગમનયને કહે છે.

નૈગમનય દેશપરિક્ષેપી અને સર્વપરિક્ષેપી એમ બે પ્રકારે છે. શબ્દનયના સાંપ્રત, સમભિરૂઢ અને એવંભૂત એમ ત્રણ પ્રકાર છે.

પ્રશ્ન– આ નયોનું લક્ષણ શું છે ?

ઉત્તર– નૈગમનય– નિગમ એટલે દેશ. જે દેશમાં જે શબ્દનો પ્રયોગ થયો હોય અને તે શબ્દનો જે અર્થ થતો હોય તેનું જ્ઞાન થવું તે નૈગમનય છે. નૈગમનયના દેશ પરિગ્રાહી અને સમગ્ર પરિગ્રાહી એમ બે ભેદ છે. (દેશ પરિગ્રાહી એટલે વિશેષ પરિગ્રાહી અને સમગ્ર પરિગ્રાહી એટલે સામાન્ય પરિગ્રાહી. દરેક વસ્તુ સામાન્ય અને વિશેષ એમ ઉભય સ્વરૂપવાળી છે. જેમકે ઘટ એ સામાન્ય છે અને લાલઘટ, કૃષ્ણઘટ વગેરે વિશેષ છે. કોઈપણ વિશેષતા વિના કોઈ પ્રકારનો ઘડો જોઈતો હોય ત્યારે ઘડો લાવ એમ બોલાય છે, પણ જ્યારે અમુક જ વિશેષ પ્રકારનો ઘડો જોઈતો હોય ત્યારે લાલ ઘડો લઈ આવ કે કાળો ઘડો લઈ આવ ઈત્યાદિ પ્રયોગ થતો હોય છે. આ બે પ્રકારના વસ્તુના સ્વરૂપમાંથી સામાન્યને ગ્રહણ કરનાર નૈગમનય સમગ્ર પરિગ્રાહી છે અને વિશેષને ગ્રહણ કરનાર નૈગમનય દેશપરિગ્રાહી છે.

સંગ્રહનય– સર્વવિશેષનો સામાન્યથી એક રૂપે ગ્રહણ કરનાર નય સંગ્રહનય છે. (જેમ કે ચેતન અને જડ એ બંને પદાર્થો ભિન્ન છે પણ સંગ્રહનય સત્ તરીકે બંનેનો સંગ્રહ કરે છે, અર્થાત્ સત્ તરીકે બંનેને સમાન માને છે જુદા માનતો નથી.)

વ્યવહારનય– (i) **લૌકિકસમ–** વ્યવહારનય લૌકિકસમ છે. જેમ લોકમાં વસ્તુના વિશેષ અંશને ગ્રહણ કરીને વ્યવહાર થાય છે તેમ જે

નય વિશેષને ગ્રહણ કરે તે વ્યવહારનય. (જેમ કે લોકમાં ઔષધિ મંગાવવી હોય તો ઔષધિ લઇ આવ એમ નથી બોલાતું કિંતુ જે ઔષધિ જોઇતી હોય તેનું નામ લઇને કહેવાય છે, જેમ કે હરડે લઇ આવ, અથવા આમળા લઇ આવ. એમ વિશેષથી કહેવાય છે.)

(ii) **ઉપચારપ્રાય–** આ નય પ્રાયઃ ઉપચારમાં પ્રવર્ત્તે છે. (જેમ કે ઘડામાં રહેલું પાણી ઝરતું હોવા છતાં ઘડો ઝરે છે એમ ઉપચાર થાય છે.)

(iii) **વિસ્તૃતાર્થ–** વ્યવહારનય ઉપચારની બહુલતાવાળો હોવાથી જ વિસ્તીર્ણ અધ્યવસાયવાળો છે, અર્થાત્ એના જ્ઞેય વિષય અનેક હોવાના કારણે વ્યવહારનય વિશેષ અર્થવાળો છે.

ઋજુસૂત્રનય– કેવળ વર્તમાનમાં વિદ્યમાન પદાર્થને ગ્રહણ કરે તે ઋજુસૂત્રનય.

શબ્દ– પદાર્થનું જેવું સ્વરૂપ છે તેવું જ ઉચ્ચારણ કરવું, અર્થાત્ કર્તા, કર્મ આદિ કારકોનું નિરૂપણ અર્થને અનુરૂપ કરવું તે શબ્દનય છે.

સાંપ્રત– પૂર્વે નામ આદિમાં પ્રસિદ્ધ બનેલા શબ્દથી અર્થનો બોધ કરવો તે સાંપ્રતનય.

સમભિરૂઢ– સત્ય અર્થોમાં અસંક્રમ તે સમભિરૂઢ નય છે, અર્થાત્ પર્યાયવાચી શબ્દોમાં એક શબ્દની વ્યુત્પત્તિથી થતા અર્થમાં બીજા શબ્દની વ્યુત્પત્તિથી થતો અર્થનો સંક્રમ ન કરવો. એટલે કે પર્યાયવાચી શબ્દોમાં પણ વ્યુત્પત્તિભેદથી અર્થનો ભેદ માનવો એ સમભિરૂઢ નય છે.

એવંભૂતનય– વ્યંજન=પદાર્થ વાચક શબ્દ અને અર્થ=અભિધેય રૂપ પદાર્થ એ બેના યથાર્થ સંબંધને સ્વીકારે તે એવંભૂતનય. અર્થાત્ વસ્તુમાં જ્યારે શબ્દનો વ્યુત્પત્તિ અર્થ સિદ્ધ થતો હોય ત્યારે તે શબ્દથી તે વસ્તુને સંબોધતો એવંભૂતનય છે. (જેમ કે આ નય ગાયક તેને જ કહે કે જે વર્તમાનમાં ગીત ગાતો હોય.)

પ્રશ્ન– આપે નૈગમ વગેરે નયો કહ્યા. તેથી તેમાં નયો એ શું પદાર્થ છે ? અર્થાત્ નય એવા શબ્દનો શો અર્થ છે ?

ઉત્તર– નય, પ્રાપક, કારક, સાધક, નિર્વર્તક, નિર્ભાસક, ઉપલમ્ભક, વ્યંજક આ બધા શબ્દો એક અર્થના વાચક છે. નય=જે વસ્તુના અંશ તરફ લઈ જાય છે=દોરે છે, અર્થાત્ જે જીવાદિ પદાર્થોને સામાન્યાદિ રૂપે પ્રકાશિત કરે છે તે નયો છે. જીવાદિ પદાર્થોને લઈ જાય (દોરે) તે નય. પ્રાપ્ત કરાવે તે પ્રાપક. સિદ્ધ કરાવે તે સાધક. ઉત્પન્ન કરે તે નિર્વર્તક. ભાસ કરાવે (વસ્તુના અંશનું જ્ઞાન કરાવે) તે નિર્ભાસક. ઓળખાવે તે ઉપલમ્ભક. પ્રગટ કરાવે તે વ્યંજક.

પ્રશ્ન– આ નયો અન્યદર્શનના વાદીઓ છે કે સ્વતંત્ર જ પ્રેરકના પક્ષને ગ્રહણ કરનારા અયથાર્થ નિરૂપણો છે ?

ઉત્તર– આ નયો અન્યદર્શનના વાદીઓ નથી અને સ્વતંત્રમતિમોહથી અયથાર્થ નિરૂપકો પણ નથી, કિંતુ જ્ઞેય પદાર્થના અન્ય-અધ્યવસાય રૂપ(=વિશેષ બોધરૂપ) છે. તે આ પ્રમાણે-

નૈગમનય– ઘટ એ પ્રમાણે બોલતા નૈગમનય આ પ્રમાણે માને છે. કુંભાર આદિના પ્રયત્નથી ઉત્પન્ન કરાયેલ, જેના ઉપરના ભાગમાં ઓષ્ઠનો ભાગ કુંડલાકારે ગોળ છે જેની ડોક લંબગોળ છે, સમાન પરિધિવાળો છે તથા જે નીચેના ભાગમાં ગોળ છે, જે પાણી-દૂધ વગેરે લાવવામાં અને ધારણ કરવામાં સમર્થ છે, અગ્નિપાકથી ઉત્પન્ન થનારા લાલરંગ આદિ ઉત્તરગુણોની પરિસમાપ્તિ થવાથી જે બની ગયો છે એવા માટીના દ્રવ્યવિશેષને ઘટ કહે છે.

સંગ્રહનય– એક ઘટમાં અથવા નામ-સ્થાપના-દ્રવ્ય-ભાવથી વિશિષ્ટ વર્તમાનકાલીન, ભૂતકાલીન, ભવિષ્યકાલીન, ઘણા ઘડાઓમાં આ ઘટ છે એવો સામાન્ય રૂપે બોધ એ સંગ્રહનય છે.

વ્યવહારનય– એક, બે કે ઘણા નામ-સ્થાપના-દ્રવ્ય-ભાવરૂપ લૌકિક પરીક્ષકોથી ગ્રાહ્ય ઉપચારગમ્ય અને યથાયોગ્ય સ્થૂલઅર્થવાળા તે જ ઘડાઓમાં આ ઘટ છે એવો જે બોધ તે વ્યવહારનય છે.

ઋજુસૂત્ર– વર્તમાનકાળમાં જ વિદ્યમાન ઘડાઓમાં આ ઘટ છે એવો બોધ તે ઋજુસૂત્ર નય છે.

સાંપ્રત– વર્તમાનકાળમાં જ વિદ્યમાન અને પૂર્વપ્રસિદ્ધ એવા નામાદિમાંથી કોઇ એકના વાચક શબ્દોમાં તેવા પ્રકારની વસ્તુનો ઘટ એવો જે બોધ તે સાંપ્રત નય છે.

સમભિરૂઢ– વર્તમાનકાળમાં વિદ્યમાન ઘટાદિ પદાર્થોના નામનું(=વાચક શબ્દોનું) સંક્રમણ ન થવું, અન્ય વાચકમાં પ્રવૃત્તિ ન થવી તે સમભિરૂઢ છે. ઘટાદિના પ્રકારથી કૂટ ન કહેવાય (ઘટાદિ જ કહેવાય), અર્થાત્ ઘટ શબ્દથી કૂટ ન કહેવાય (ઘટ શબ્દથી ઘટ જ કહેવાય). કેમ કે બંનેનું પ્રવૃત્તિ નિમિત્ત ભિન્ન છે. (ઘટનું પ્રવૃત્તિ નિમિત્ત ચેષ્ટા છે, કૂટનું પ્રવૃત્તિ નિમિત્ત કૂટન છે.)

અહીં અધ્યવસાયનો અર્થ જ્ઞાન છે. આમ છતાં જ્ઞાનના ઉત્પાદક નામને(=શબ્દને) પણ ઉપચારથી અધ્યવસાય કહેવાય. આથી વિતર્ક ધ્યાનની જેમ અધ્યવસાયનો નામ(=શબ્દ) અર્થ કર્યો છે.

એવંભૂત– સમભિરૂઢથી સ્વીકૃત ઘટાદિ પદાર્થોના જે વ્યંજન(=શબ્દ) અને અર્થ એ બેની અન્યોન્યની અપેક્ષાથી અર્થને ગ્રહણ કરવું તે એવંભૂત નય છે.

પ્રશ્ન– એક પદાર્થમાં જુદો જુદો બોધ થવાથી વિરુદ્ધજ્ઞાનનો પ્રસંગ આવશે.

ઉત્તર– વિરુદ્ધજ્ઞાનનો પ્રસંગ ન આવે. તે આ પ્રમાણે- બધું એક જ છે. કેમ કે સત્ રૂપે કોઇમાં ભેદ નથી, અર્થાત્ બધા જ સત્ છે. બધી વસ્તુઓ બે છે. કેમ કે બધી વસ્તુઓ જીવ સ્વરૂપ કે અજીવ સ્વરૂપ છે. (જીવ કે અજીવથી ત્રીજી કોઇ વસ્તુ નથી.) બધી વસ્તુઓ ત્રણ છે. કારણ કે દ્રવ્ય-ગુણ-પર્યાય એ ત્રણમાં બધાનો સમાવેશ થઇ જાય છે. બધી વસ્તુઓ ચાર છે. કારણ કે બધી વસ્તુઓનો ચક્ષુદર્શન વગેરે ચારમાં સમાવેશ થઇ જાય છે. બધી વસ્તુઓ પાંચ છે. કેમ કે બધી વસ્તુઓનો

ધર્માસ્તિકાય વગેરે પાંચ કાયમાં સમાવેશ થઈ જાય છે. બધી વસ્તુઓ છ છે. કેમ કે બધી વસ્તુઓનો છ દ્રવ્યમાં સમાવેશ થઈ જાય છે. જેમ આ જ્ઞાનો વિરુદ્ધ જ્ઞાનો થતા નથી- અન્યોન્ય બોધ રૂપ છે. તેવી રીતે આ નયવાદો અન્યોન્ય બોધ રૂપ છે. વળી બીજું- જેવી રીતે મતિજ્ઞાન વગેરે પાંચ જ્ઞાનોથી ધર્માસ્તિકાય વગેરે પાંચ કાયોનો કોઇ એક અર્થ જુદો જુદો ગણાય છે. કેમ કે તે જ્ઞાનોમાં પર્યાય વિશુદ્ધિના ભેદથી ઉત્કર્ષ છે. જેમ આ જ્ઞાનો વિરુદ્ધ જ્ઞાનો નથી તેમ નયવાદો વિરુદ્ધ જ્ઞાનો નથી. અથવા જેમ પ્રત્યક્ષ અનુમાન-ઉપમાન અને આગમ એ પ્રમાણોથી કોઇ એક અર્થ જણાય છે. કેમ કે દરેક પ્રમાણનો પોતાનો વિષય નિશ્ચિત છે. જેમ તે જ્ઞાનો વિરુદ્ધ જ્ઞાનો નથી તેમ નયવાદો વિરુદ્ધ જ્ઞાનો નથી.

જુદા જુદા દેશોમાં ઉચ્ચારાતા (વપરાતા) શબ્દો અને અર્થોના એક (વિશેષરૂપ) અનેક(=સામાન્યરૂપ) પદાર્થોને પ્રકાશન કરવાના પ્રકારોના (પ્રકાશન કરવાની રીતના) બોધની અપેક્ષાવાળો દેશગ્રાહી અને સમગ્રગ્રાહી એમ બે પ્રકારે નૈગમનય જાણવો. (૧)

સામાન્યમાં, સામાન્ય-વિશેષમાં કે વિશેષમાં સંગ્રહ કરેલ વચનરૂપ જ્ઞાનને નયભેદોના જાણકાર પુરુષે સંગ્રહમાં નિયત થયેલો જાણવો. (૨)

સમુદાય, વ્યક્તિ, આકૃતિ, સત્તા(=સામાન્ય), સંજ્ઞા વગેરેના નિશ્ચયની અપેક્ષાવાળો તથા લોકોપચારમાં નિયત થયેલો અને વિસ્તૃત અર્થવાળો, આવા નયને વ્યવહારનય જાણવો. (૩)

વર્તમાનકાળના પદાર્થને ગ્રહણ કરનાર નયને સંક્ષેપથી ઋજુસૂત્ર નય જાણવો. યથાર્થશબ્દવાળો=યથાર્થશબ્દના પ્રયોગવાળો અને (વિશેષિતપદં=)જેના નામાદિ વિશેષતાવાળા કરાયેલા છે તે નયને શબ્દનય જાણવો. (૪)

પ્રશ્ન– જીવ, નોજીવ, અજીવ, નોઅજીવ એ પ્રમાણે ઉચ્ચારાયે છતે નૈગમાદિ નયોમાંથી કયા નયથી કયો અર્થ જણાય છે ?

ઉત્તર– જીવ એવા પદનું ઉચ્ચારણ કરાયે છતે દેશગ્રાહી નૈગમ, સંગ્રહ, વ્યવહાર, ઋજુસૂત્ર, સાંપ્રત અને સમભિરૂઢ નયથી પાંચેય ગતિમાં રહેલો કોઇ એક જીવ જણાય છે.

પ્રશ્ન– શાથી ?

ઉત્તર– આ નયો જીવને આશ્રયીને ઔપશમિકાદિ ભાવોથી યુક્ત પદાર્થને ગ્રહણ કરનારા છે.

નોજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે અજીવ દ્રવ્ય અથવા જીવદ્રવ્યના દેશ અને પ્રદેશ જણાય છે.

અજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે અજીવ દ્રવ્ય જ જણાય છે.

નોઅજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે જીવ જ અથવા તેના દેશ અને પ્રદેશ જણાય છે.

એવંભૂત નયથી તો જીવ એવા પદનું ઉચ્ચારણ કરાયે છતે ભવમાં રહેલો જીવ જણાય છે. (શાથી ?) આ નય જીવને આશ્રયીને ઔદયિક ભાવને જ ગ્રહણ કરનાર છે. જે જીવે તે જીવ, અર્થાત્ જે પ્રાણોને ધારણ કરે તે જીવ. તે(=પ્રાણોને ધારણ કરવા રૂપ) જીવન સિદ્ધમાં નથી હોતું તેથી ભવમાં રહેલો જ જીવ જણાય છે.

નોજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે અજીવદ્રવ્ય કે સિદ્ધજીવ જણાય છે.

અજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે અજીવદ્રવ્ય જ જણાય છે.

નોઅજીવ એવા પદનું ઉચ્ચારણ કરાયે છતે ભવમાં રહેલો જ જીવ જણાય છે. કેમ કે આ નય સંપૂર્ણ અર્થને ગ્રહણ કરનારો હોવાથી આ નય વડે દેશ અને પ્રદેશ ગ્રહણ કરાતા નથી.

એ પ્રમાણે "जीवौ" એમ દ્વિવચનમાં અને "जीवाः" એમ બહુવચનમાં ઉચ્ચારાયે છતે આ રીતે જાણવું.

સર્વ (ગ્રાહી) સંગ્રહનયમાં તો જીવો, નોજીવઃ, અજીવો, નોઅજીવઃ, જીવૌ, નોજીવૌ, અજીવૌ અને નોઅજીવૌ આ પ્રમાણે એકવચન અને દ્વિવચનમાં ઉચ્ચાર કરાયે છતે શૂન્ય છે. સંગ્રહનયને આ વિકલ્પો ઇષ્ટ

નથી. (શાથી ?) આ(=સર્વગ્રાહી સંગ્રહ)નય જીવોની અનંત સંખ્યા હોવાથી બહુવચનને જ ઇચ્છે છે. કારણ કે આ નય યથાર્થ પદાર્થને ગ્રહણ કરે છે. શેષ નયો તો જાતિની અપેક્ષાએ એકમાં બહુવચન અને બહુમાં બહુવચન માને છે. કારણ કે બાકીના નયો બહુવચન વગેરે બધાય વચનોથી ઉચ્ચારણ કરાયેલા વિકલ્પોને ગ્રહણ કરનારા છે.

આ પ્રમાણે સર્વ પદાર્થોમાં નયવાદોથી બોધ કરવો.

પ્રશ્ન– વિપર્યયથી સહિત પાંચ જ્ઞાનોમાં કયો નય કયા જ્ઞાનનો આશ્રય કરે છે(=સ્વીકારે છે) ?

ઉત્તર– નૈગમ વગેરે ત્રણ નયો બધાય=આઠેય જ્ઞાનોનો આશ્રય (સ્વીકાર) કરે છે. ઋજુસૂત્ર નય મતિજ્ઞાન અને મત્યજ્ઞાન એ બેને છોડીને છ જ્ઞાનોનો આશ્રય કરે છે.

પ્રશ્ન– ઋજુસૂત્ર નય શા કારણથી મતિજ્ઞાન અને મત્યજ્ઞાનનો આશ્રય કરતો નથી ?

ઉત્તર– મતિજ્ઞાન વિપર્યય સહિત શ્રુતજ્ઞાનને ઉપગ્રહ કરે છે.

શબ્દનય તો શ્રુતજ્ઞાન અને કેવલજ્ઞાન એ બે જ્ઞાનનો જ આશ્રય કરે છે.

પ્રશ્ન– શબ્દનય કયા કારણથી શ્રુત અને કેવલજ્ઞાન સિવાયના જ્ઞાનોનો આશ્રય કરતો નથી ?

ઉત્તર– મતિ, અવધિ, મનઃપર્યાય એ ત્રણ જ્ઞાનો શ્રુતને જ ઉપગ્રહ કરે છે માટે શબ્દનય તેનો (શ્રુતજ્ઞાન, કેવળજ્ઞાન સિવાયનો) આશ્રય કરતો નથી. તથા સર્વ જીવોનો સામાન્ય રૂપે અને વિશેષરૂપે જાણવાનો સ્વભાવ હોવાથી આના મતે કોઇ જીવ મિથ્યાદૃષ્ટિ કે અજ્ઞાન નથી તેથી પણ વિપર્યયવાળા જ્ઞાનોનો આશ્રય કરતો નથી. આથી (કોઇ જીવ મિથ્યાદૃષ્ટિ કે અજ્ઞાન ન હોવાથી) પ્રત્યક્ષ-અનુમાન-ઉપમાન-આગમ પ્રામાણ્યની અનુજ્ઞા આપે છે=પ્રામાણ્યને સ્વીકારે છે. કહ્યું છે કે- એકાર્થપદોને, અર્થપદોને, વિધાનને, ઇષ્ટને, શાસ્ત્રોક્ત યુક્તિ વગેરેને જાણીને સર્વત્ર નામાદિથી વિન્યાસ(=રચના) કરીને નયો વડે જીવાદિ સાત તત્ત્વોની વિચારણા કરવી જોઇએ. કારિકા (૧)

પ્રારંભના નૈગમ, સંગ્રહ, વ્યવહાર એ ત્રણ નયો વિભંગ સુધીના આઠ પ્રકારના જ્ઞાન (૫ જ્ઞાન + ૩ અજ્ઞાન)ને સ્વીકારે છે. સામાન્યથી સમ્યગ્દૃષ્ટિનું જ્ઞાન સમ્યગ્જ્ઞાન છે, મિથ્યાદૃષ્ટિનું જ્ઞાન મિથ્યાજ્ઞાન છે. કારિકા (૨)

ઋજુસૂત્ર નય મતિજ્ઞાન અને મતિઅજ્ઞાન સિવાય છ જ્ઞાનને સ્વીકારે છે. શ્રુતનો ઉપકારક હોવાથી અને શ્રુતથી અભિન્ન હોવાથી આ નય મતિજ્ઞાન અને મતિઅજ્ઞાનને સ્વીકારતો નથી. શબ્દનય શ્રુતજ્ઞાન અને કેવળજ્ઞાનને સ્વીકારે છે. મતિ આદિ અન્યને સ્વીકારતો નથી. કેમકે અન્ય જ્ઞાનો શ્રુતનું અંગ છે. કારિકા (૩)

શબ્દનય મિથ્યાદૃષ્ટિને અને અજ્ઞાનને સ્વીકારતો નથી. કારણ કે શબ્દનયના મતે કોઇ જીવ અજ્ઞાન નથી, જીવનો જાણવાનો સ્વભાવ હોવાથી કોઇ જીવ મિથ્યાદૃષ્ટિ નથી અને અજ્ઞાન પણ નથી. કારિકા (૪)

આ પ્રમાણે નયવાદો નૈગમાદિ ભેદોથી વિવિધ પ્રકારના છે. સ્વરૂચિથી ગ્રહણ કરેલી વસ્તુના અંશમાં જાણે વિરુદ્ધ હોય તેવા જણાય છે. આમ છતાં તે નયવાદો વિશુદ્ધ છે. આ નયવાદો લૌકિક શાસ્ત્રોને ઓળંગી ગયા છે, અર્થાત્ વૈશેષિકાદિ લૌકિક શાસ્ત્રોમાં નયોનું વર્ણન નથી. વસ્તુના સત્ય સ્વરૂપના જ્ઞાન માટે, અર્થાત્ સ્વપર દર્શનના બોધ માટે આ નયવાદો જાણવા જોઇએ. કારિકા (૫)

આ પ્રમાણે સ્વોપજ્ઞ ભાષ્યયુક્ત તત્ત્વાર્થાધિગમસૂત્રમાં પહેલો અધ્યાય પૂર્ણ થયો. (૧-૩૫)

ટીકા– आदौ भवः आद्यः, शब्दनाच्छब्दः, आद्यश्च शब्दश्च आद्यशब्दौ, नयौ द्वित्रिभेदाविति सूत्रसमुदायार्थः । अवयवार्थमाह-'आद्य' इत्यादिना ग्रन्थेन, आद्य इति सूत्रक्रमप्रामाण्यात् यथोपन्यासात् नैगमसंग्रहेत्यादिपाठात् नैगमनयं ब्रवीति, स द्विभेदः, असौ यो नैगमः द्विभेदः द्वौ भेदौ अस्येति द्विभेदः, भेदावेवाह-'देशपरिक्षेपी च, सर्वपरिक्षेपी च' देशः-विशेषः परमाण्वादिगतस्तं परिक्षेषुं शीलमस्येति देशपरिक्षेपी, विशेषग्राहीत्यर्थः, सर्वं-सामान्यं तद्व्यापित्वात् तत्

परिक्षेसुं शीलमस्येति सर्वपरिक्षेपी, सामान्यग्राहीत्यर्थः, चशब्दौ पृथक्पृथक्स्वातन्त्र्यख्यापनपरौ, शब्दनयः (त्रिभेदः) त्र्यंशः, तानाह 'साम्प्रते'त्यादिना, साम्प्रतवस्त्वाश्रयणात् साम्प्रतः, नानार्थसमभिरोहणात् समभिरूढः, यथाभूतः-एवम्भूतोऽन्वर्थप्रधानत्वात्, इति समुच्चये परिसमाप्तौ वा, 'अत्राहे'त्यादि अत्राधिकारे आह परः, किमेषां नैगमादीनां लक्षणमिति, प्रश्नोत्तराभिधित्सयाऽऽह-'अत्रोच्यते-निगमेष्वि'त्यादि, निश्चयेन गम्यते उच्चार्यते प्रयुज्यते येषु शब्दास्ते निगमा-जनपदास्तेषु निगमेषु-जनपदेषु येऽभिहिताः उच्चारिताः शब्दा-घटादयस्तेषामर्था-जलाद्यानयनार्थक्रियासमर्था घटादय एव, शब्दार्थ-प्रतिज्ञानं च वाच्यवाचकभावेन, सोऽयमित्थं प्रपञ्चः, किमित्याह-'देशसमग्रग्राही नैगम'इति देशो-विशेषः देशत्वादेव समग्रं-सामान्यं समग्रव्याप्तेः एतद्ग्राही नैगमः, सौवर्णो घटः घट इति च ग्रहणात्, उभयग्रहणेऽपि नय एव, स्वविषयप्राधान्यादिति । सङ्ग्रहलक्षणमाह-'अर्थाना'मित्यादिना, अर्थानां-घटादीनां सर्वैकदेशसङ्ग्रहणं सङ्ग्रहः, सर्वं-सामान्यं सर्वव्याप्तेः देशो-विशेषः देशत्वादेव, तयोः सर्वैकदेशयोः सामान्यविशेषात्मकयोः एकीभावेन सङ्ग्रहणं सङ्ग्रहः, सन्मात्राविशेषात् तदतिरिक्तवस्त्वभावादिति । व्यवहारलक्षणाभिधित्सया त्वाह-'लौकिके'त्यादि, लोके-मनुष्यादिस्वभावे ये विदितास्ते लौकिकाः-पुरुषाः तैः समः-तुल्यः, यथा चैते विशेषैर्व्यवहरन्ति तथाऽयमपीति 'उपचारप्रायः' उपचारबहुलः, अन्यत्र सिद्धस्यार्थस्यान्यत्राध्यारोप उपचारः यथा कुण्डिका श्रवति पन्था गच्छतीत्यादि, इह कुण्डिकास्थं जलं श्रवति, पथिस्थाः पुरुषा गच्छन्तीति, अत एव 'विस्तृतार्थः' विस्तीर्णाध्यवसायः व्यवहार इति । ऋजुसूत्रलक्षणं तु 'सता'मित्यादि, सतां-विद्यमानानां, नासतां खपुष्पादीनां, सतामपि साम्प्रतानां, नातीतानामनागतानाम् अर्थानां-घटादीनां, नानर्थानां कल्पितानां,

'अभिधानपरिज्ञानं' अभिधानं-शब्दः परिज्ञानम्-अवबोधः अभिधानं च परिज्ञानं चाभिधानपरिज्ञानं यच्च ऋजुसूत्र इति । शब्दलक्षणमाह-''यथार्थाभिधानं शब्दः' यथार्थं च तदभिधानं च यथार्थाभिधानं, भावघटाभिधानमित्यर्थः, शब्द इति शब्दनयः, तदाश्रयोऽध्यवसाय इत्यर्थः, अयं च समानलिङ्गसङ्ख्यापुरुषकालवचनः, अतः स्वाति तारा नक्षत्रमित्यस्यावस्तु, तथा चाम्रकदम्बा वनं, तथा स पचति त्वं पचसि अहं पचामीत्यादि, तथा अग्नीष्टोमयाज्यस्य पुत्रो यति(भवि)तेत्येवमादि सर्वमवस्तु, परस्परव्याघातात्, नीलरक्तादिवत्, अयं च साम्प्रतादि-भेदात्त्रिविध उक्त इति साम्प्रतलक्षणमाह-'नामे'त्यादिना, 'नामादिष्वि'ति नामस्थापनाद्रव्यभावेषु 'प्रसिद्धपूर्वकत्वादि'ति प्रसिद्धो-निर्ज्ञातः पूर्व-संज्ञासंज्ञिसम्बन्धकाले, प्रसिद्धः पूर्वमिति प्रसिद्धपूर्वः, अयमेव प्रसिद्धपूर्वकस्वभावस्तस्मात् शब्दाद्-घटादेः-अर्थे भावरूपे तस्यैवा-भिधेयत्वात् प्रत्यय इत्यध्यवसायः साम्प्रत इति, अयं चेह सामान्यशब्द एवेति सप्त नयाः, अन्ये त्वनेकवाचकैकशब्दानभ्युपगमेनास्य भेदमाहुः, सिंहादावनेकस्मिन्नर्थे हरिशब्दानभ्युपगमात् । समभिरूढलक्षणमाह-'सत्सु अर्थेष्वि'त्यादि, सत्सु-विद्यमानेषु वर्त्तमानपर्यायापन्नेषु अर्थेषु-घटादिषु घटः कुटः कुम्भ इत्येवमनेकप्रवृत्तिनिमित्तसमुपलक्षणेषु 'असंक्रम' इत्यन्यत्रागमनं, शब्दस्य प्रवृत्तिनिमित्तं विहाय, घटशब्दस्य कुटार्थवत्यसंक्रमाध्यवसायः समभिरूढ इति, घटनाद् घटः कुटनात् कुटः कुम्भनात् कुम्भ इति भिन्नप्रवृत्तिनिमित्ता एवैते शब्दा घटकुटादि-शब्दवदिति पर्यायशब्दाभावः, इन्द्रादिशब्दानामपि इन्दनशकनपूर्दारणादि-क्रियाभेदादिति । इत्थम्भूतलक्षणं त्वदः-'व्यञ्जनार्थयोरेवंभूत' इति व्यञ्जनं-शब्दः तदभिधेयोऽर्थः तयोर्व्यञ्जनार्थयोः एवं पर्यायाभाव-वद्वाच्यवाचकप्रवृत्तिनिमित्तभावे भूतो यथार्थ एवंभूत इति, यथा घटशब्दो न कुटार्थवाचकः, प्रवृत्तिनिमित्ताभावात् एवं नाचेष्टावदर्थ-

वाचकोऽप्यत एव हेतोः, अर्थोऽपि तत्क्रियाशून्यो न स इति, तथा अर्यमाणत्वाभावात्, अतो यदैव योषिन्मस्तकाधिरूढो जलाद्यानयनाय चेष्टते तदैव घटः, घटवाचकोऽपि घटशब्दोऽस्य तदैवेत्यध्यवसाय एवम्भूतः । एतानि वाक्यानि सूत्राणि इति केचित्, तत्तु न वृत्त्यभावात्, तन्नयलक्षणवाक्यान्येवेति । उक्तं नयलक्षणं, एतेषां चाद्याश्चत्वारोऽर्थनयाः, अर्थप्रधानत्वाच्छब्दोपसर्जनाः, शेषास्तु शब्दनयाः, शब्दप्रधानत्वात् अर्थोपसर्जना इति । 'अत्राहे'त्यादि, अत्रावकाशे यथोदितगृहीत-नयस्वरूपश्चोदक आह-'उद्दिष्टा' अभिहिता लक्षणतः 'भवता' त्वया नैगमादयो नयाः, 'तन्नया इति कः पदार्थ इति, तन्नया इति लौकिकवाचोयुक्तिः,तद्राजा कीदृश इति यथा, इह नयाः शब्दनया गृह्यन्ते, यदाह-नया इत्यस्य कः पदार्थ इति, तदस्य पदार्थत्वोपपत्तेः, कोऽर्थ इति वा, अनभिधानं गम्यार्थव्यपोहेन वाच्यार्थसंग्रहार्थं, कः पदार्थ इति को वाच्योऽर्थः ?, अनेककारकसन्निधाने सति कः प्रत्ययार्थो ग्राह्य इति प्रश्ननिमित्तं, एवं चोदकेन प्रश्ने कृते सत्याचार्य आह-'तत्रोच्यत' इत्यादि, नयाः प्रापका इत्यादिना कर्त्रर्थः प्रदर्श्यते, नयन्त इति नयाः, सामान्यादिरूपेणार्थं प्रकाशयन्तीत्यर्थः, प्रापका इत्यनेन नयतेरन्तर्णीतण्यर्थता ख्याप्यते, प्रापयन्त्यात्मनि तं तमर्थं स्वाभिमताभि-रुपपत्तिभिरिति प्रापकाः, कारका इत्यादिभिस्तु नयतेरर्थान्तरतापि भवति, अनेकार्थत्वाद् धातूनामिति दर्शयति, कुर्वन्ति तद् तद्विज्ञानमात्मन इति कारकाः, एवं साधयन्ति तं तमात्मीयं योगिनमिति साधकाः, एवं निर्व्वर्त्तयन्ति तथा आत्मानमिति निर्वर्त्तकाः, एवं निर्भासयन्ति-दीपयन्ति स्वां स्वां व्यक्तिमिति निर्भासकाः, एवमुपलम्भयन्ति ताँस्तान् सूक्ष्मान् अर्थविशेषानित्युपलम्भकाः, एवं व्यञ्जयन्ति-स्पष्टयन्ति तथा तथा स्वाभिप्रायेण वस्त्विति व्यञ्जकाः 'इत्यनर्थान्तर'मिति कथञ्चिद्भेदे सत्यपि पर्यायभेदा एत इत्यर्थः, सकर्म्मकाणां प्राप्येन कर्मणा भवि-

तव्यमिति तद्दर्शयन्नाह-जीवादीन् सप्त पदार्थान् प्रागुद्दिष्टान् नयन्ति इति नयाः, तद्धर्म्मा एवं सन्तस्तानेव नयन्ते, अनेन कर्तृकरणानां वास्तवं न्यायमधिकृत्य कथञ्चिद्भेदमाह, इत्यत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तारभयादिति, 'अत्राहे'ति पूर्ववत्, किमेते नैगमादयो नयास्तन्त्रान्तरीयाः तन्यन्ते-विस्तार्यन्ते अर्था अनेनास्मिन्निति वा तन्त्रं-प्रवचनं तस्मादन्यत् कापिलादि तन्त्रान्तरं तस्मिन् भवाः कुशला वा तन्त्रान्तरीया वादिनः स्वशास्त्रसिद्धार्थवदनेन, आहोस्विदित्युत स्वतन्त्रा एव 'चोदकपक्षग्राहिण इति' दुरुक्तादीनि चोदयतीति चोदकः तस्य पक्षो-विषयः तं ग्रहीतुं शीला इति, मतिभेदो-बुद्धिभेदस्तेन विप्रधावितः-अयथार्थनिरूपका इति, एतत्परिहारार्थमाह-'अत्रोच्यते' इत्यादि, न एते तन्त्रान्तरीयाः, ते हि निर्विषया एव, अवधारणदोषात्, नापि स्वतन्त्रा एव चोदकपक्षग्राहिणः मतिभेदेन विप्रधावितः, तदसम्बद्धप्रलापित्वादिति, 'ज्ञेयस्ये'त्यादि, ज्ञेयस्यार्थस्य जीवादिघटादेः अध्यवसायान्तराण्येवैतानि, विज्ञानभेदा इत्यर्थः, वाच्यं ज्ञेयमधिकृत्यैतदुपदर्शयन्नाह-'तद्यथे'ति पूर्ववत् घट इत्युक्ते नैगमाध्यवसाय एवं मन्यते 'योऽसा'विति यो लोकप्रसिद्धः 'चेष्टाभिर्निवृत्तः' इति कुलालादिचेष्टानिष्पादितः, किमाकार इत्याह-'ऊर्ध्वकुण्डलोष्टायतवृत्तग्रीवः' ऊर्ध्वकुण्डलोष्ठश्चासावायतश्च वृत्तग्रीवश्चेति समासः, तथा चोर्ध्वं परिकुण्डलं वृत्तावौष्ठो यस्य एवं आयता-दीर्घा वृत्ता-समपरिधि ग्रीवेति, तथा अधस्ताद्-अधोभागे परिमण्डलो-वृत्तः, एवं जलक्षीरादीनां आहरणधारणसमर्थः, आहरणं देशाद्देशान्तसञ्चारणं, धारणं तेषामेव देशनियतं, एतत्प्रत्यलं उत्तर-गुणनिर्वर्त्तनया-आपाकजरक्ततादिगुणपरिसमाप्त्या निर्वृत्तो-निष्पन्नः द्रव्यविशेष इति मृद्द्रव्यभेदः, तस्मिन्नेवमात्मके एकस्मिन्नेव विशेषवति-शुक्लपीतादिविशेषयुक्ते तज्जातीयेषु वा तत्प्रकारेषु वा सर्वेष्वविशेषाद्-अभेदेन सामान्येन परिज्ञानम्-अवबोधो नैगमः, तथा एकस्मिन् घटे

बहुषु घटेषु 'नामादिविशेषितेष्वि'ति नामस्थापनाद्रव्यभावविशिष्टेषु साम्प्रतेषु-वर्त्तमानेषु अतीतेषु-अतिक्रान्तेषु अनागतेषु-भाविषु घटेषु सम्प्रत्ययो घट इति सामान्याध्यवसायः सङ्ग्रहः, सामान्यप्रधानत्वादिति, एवं तेष्वेव घटेषु एकद्विबहुनामादिरूपेषु 'लौकिकपरीक्षकग्राह्येषु' लोके विदिता लौकिकाः-अव्युत्पन्नमतयः परीक्षकास्तु-शास्त्रव्युत्पन्नमतय इति, एतद्ग्राह्येषु तत्फलार्थमविप्रतिपन्नाः, 'उपचारगम्येष्वि'ति समुद्रो घट इत्यादिनीतेर्यथास्थूलार्थेष्विति सूक्ष्मसामान्यव्यपोहेन सम्प्रत्ययो घट इत्यध्यवसायो व्यवहारो विशेषप्रधानत्वादिति, तथा 'तेष्वेवे'त्यादि, तेष्वेव घटेषु 'सत्सु' विद्यमानेषु (साम्प्रतेषु-वर्त्तमानेषु) सम्प्रत्ययो घट इत्यध्यवसायः ऋजुसूत्रः । एवं 'तेष्वि'त्यादि, तेष्वेव साम्प्रतेषु-वर्त्तमानेषु 'नामादीनां' नामस्थापनाद्रव्यभावानामन्यतमग्राहिषु यस्माद्यस्य शब्दस्य नम्यमानः पदार्थो वाच्यः न तस्य स्थापना न तस्य द्रव्यं न तस्य भाव इत्यतो नामादीनां घटानां ये शब्दा अन्यतमं-नामस्थापनादिकं गृह्णाति तेऽन्यतमग्राहिणस्तेषु, एतेष्वपि 'प्रसिद्धपूर्वकेषु' प्रसिद्धः पूर्वो येषां प्रथमसङ्केतस्ते प्रसिद्धपूर्वाः त एव प्रसिद्धपूर्वकाः तेषु, नामादीनामन्यतमवाचकेषु, सम्प्रत्ययस्तथा घट इत्यध्यवसायः साम्प्रतः, शब्दः सामान्य इत्यर्थः, एवं 'तेषा'मित्यादि, तेषामेव घटादीनां साम्प्रतानां-वर्त्तमानावधिकानां सम्बन्धी 'अध्यवसायासङ्क्रमः' अध्यवसायो-ज्ञानं तदुत्पादकमभिधानमप्यध्यवसायः तस्यासङ्क्रमः अन्यत्र वाच्ये अप्रवृत्तिः, न हि घटादिभेदेन कुट उच्यते, भिन्नप्रवृत्ति-निमित्तत्वात्, इहैव निदर्शनमाह-'वितर्क्कध्यानवदि'ति, वितर्कः-श्रुतं तत्प्रधानं ध्यानं वितर्क्कध्यानं तद्वत्, एतच्चैकत्ववितर्कं, द्वितीयमिह गृह्यते इत्यध्यवसायः समभिरूढ इति । 'तेषामेवे'त्यादि, 'तेषामेव' अनन्तरनयपरिगृहीतघटादीनां यौ व्यञ्जनार्थौ तयोर्व्यञ्जनार्थयोरन्यो-ऽन्यापेक्षार्थग्राहित्वमिति स्वप्रवृत्तिनिमित्तभावेन यथा व्यञ्जनं तथाऽर्थो

यथाऽर्थः तथा व्यञ्जनम्, एवं हि सति वाच्यवाचकसम्बन्धो, नान्यथा, पुष्टप्रवृत्तिनिमित्ताभावेनेत्यध्यवसाय एवंभूत इति । इह चाध्यवसायो ज्ञाननय उक्तः, साक्षाच्छास्त्राधिकारात्, ज्ञेयः अस्यार्थनयः, वाचकस्तु शब्दनय इत्येवमवगन्तव्यमिति । 'अत्राहे'त्यादि एवमुक्तनीत्या (इदानीं) एकस्मिन्नर्थे घटादौ अध्यवसायनानात्वात् विज्ञानभेदात् ननु विप्रतिपत्तिप्रसङ्ग इति, ननुशब्दो मीमांसायां, मीमांसनीयमेतत्-एवं विप्रतिपत्तिप्रसङ्ग इति-विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः तस्याः प्रसङ्गोऽनिष्टमित्यर्थः, न ह्येकनिमित्ताः अनेकाः प्रतिपत्तयो भवितुमर्हन्ति, कृष्णे नीलादिप्रतिपत्तय इवेत्यभिप्रायः, एवं पूर्वपक्षमाशङ्क्याह-'अत्रोच्यत'इत्यादिना, अत्र विरुद्धाः प्रतिपत्तिः, न चैकान्तेनैकनिमित्ता अतः साध्व्येवेति 'यथे'त्यादिना दर्शयति, यथा सर्वं जगदनेकावयवात्मकमपि सत् एकं, कुत इत्याह-'सदविशेषात्' सत्त्वेनाभेदात्, अविशेषेण सच्छब्दवदिति प्रतीतिसिद्धेः, एवं सर्वं द्वित्वं, द्वयोर्भावो द्वित्वं जीवाजीवात्मकत्वात् सर्वस्य, तथोभयभेदश्च प्रतीतिभेदात्, न हि सत्प्रतीतिमात्रं जीवादिप्रतीतेरिति, एवं सर्वं त्रित्वं, त्रयाणां भावः त्रित्वं द्रव्यगुणपर्यायावरोधात्सर्वस्य, इहान्वयि द्रव्यं, गुणा-रूपादयः, पर्यायाः-कपालादयः इति प्रतीतिः, अत्रापि भेदनिमित्तमिति त्रिषु सर्वस्यावरोधः, एवं सर्वं चतुष्कं, चतुर्णां भावः चतुष्कं चतुर्दर्शनावरोधात् सर्वस्य, चक्षुर्दर्शनादीनि चत्वारि दर्शनानि तैः सर्वस्यावरोधो-ग्रहणं, विशेषाणामपि कथञ्चित् सामान्यभेदादिति, एवं सर्वं पञ्चत्वं पञ्चानां भावः अस्तिकायावरोधात् सर्वस्य पञ्चभिरस्तिकायैर्धर्म्मादिभिरवरुद्धत्वादित्यर्थः, एवं सर्वं षट्कं, षण्णां भावः, षड्द्रव्यावरोधाच्च षड् द्रव्याणि धर्मास्तिकायादीन्येव कालावसानानि, 'कालश्चेत्येके' इति (५-३८) वचनात्, भिन्नश्च कथञ्चिद्द्रव्यपरिणामोऽस्तिकायपरिणामात्, प्रदेशसंघातद्रवणनिमित्तभेदादिति । प्रकृतयोजनामाह- 'यथे'त्यादिना, यथैताः सदादिप्रति-

प्रत्तयोऽनन्तरोपन्यस्ता न विप्रतिपत्तयो न विरुद्धाः प्रतिपत्तयः, सर्वस्य जगतः तत्तद्धर्मभेदेन तस्यैव तथाप्रतीतेः, अथ च अध्यवसाय-स्थानान्तराणि-विज्ञानान्तराण्येतानि, प्रतिपत्त्यपह्नवायोगात्, अतिप्रसङ्गा-पत्तेः शून्यताप्रसङ्गादिति, 'तद्वन्नयवादा' इत्यनेकधर्मात्मकवस्तुगोचराः क्षयोपशमवैचित्र्यतस्तत्तद्धर्म्माध्यवसायनिबन्धना इत्यर्थः, निदर्शनान्तर-माह-'किञ्चान्यदि'त्यादिना, यथा मतिज्ञानादिभिः प्रागभिहितस्वरूपैः पञ्चभिः केवलान्तैः ज्ञानैर्धर्मादीनामस्तिकायानां वक्ष्यमाणलक्षणा-नामन्यतमोऽर्थ इति-धर्मादिः पृथक् पृथगध्यवसायभेदेनोपलभ्यते, तथा अनुभवसिद्धत्वाद्, इहैव निमित्तमाह-'पर्यायविशुद्धिविशेषादि'ति, पर्याया-वस्तुभेदाः विशुद्धिः-क्षयोपशमादिरूपा तद्विशेषात्-तद्भेदात् उत्कर्षेण-प्रकर्षेण लभ्यते, एकं च तद्वस्तु अनेकधर्मात्मकतया, न च ता विप्रतिपत्तयो मिथ्यादिप्रतिपत्तयः, तद्वन्नयवादा न विप्रतिपत्तय इति भावितमेतत्, निदर्शनान्तरमाह-'यथा वे'त्यादिना, यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः चतुर्भिः प्रमाणैः एकोऽर्थः प्रमीयते अग्न्यादिः प्रत्यक्षेणासन्नेन प्रमात्रा ज्वलद्भास्वराकारस्तार्णादिविशेषः, अनुमानेन तु धूमाद्विप्रकृष्टेन सामन्यतस्तद्देशनियतः, उपमानेन तु मध्यदेशवर्त्तिना निर्धूमः कनकपुञ्जपिञ्जरत्वसाधर्म्येण, आप्तवचनेन तु विप्रकृष्टेन प्रमात्रा तथा अनवच्छिन्नदेशसामान्य एवेति, एवमेकोऽर्थः प्रमीयते-परिच्छिद्यते, कथं न सर्वेषामेवैकाकारा प्रतिपत्तिरित्याह-'स्वविषयनियमादि'ति स्वः-आत्मीयो विषयो-ज्ञेयः स्वश्चासौ विषयश्चेति स्वविषयः तस्मान्नियमात्-नियतत्वात्, अनेनैकान्ततः प्रमाणसम्प्लवव्य-वच्छेदमाह, प्रतीतिभेदानुभूतेर्वैय्यधिकरण्यव्यवच्छेदं च, तथा तथा अग्न्यनुभवोपपत्तेः, 'न चे'त्यादि, न च ता ज्वलद्भास्वदाकारादिलक्षणाः प्रतिपत्तयो विप्रतिपत्तयो भवन्ति, सर्वाभिरपि तथा तत्परिच्छेदात्, तथा अनुभवसिद्धेः, तद्वन्नयवादा इति न विप्रतिपत्तयः, एतदुक्तं भवति-

एकानेकस्वभावे वस्तुनि सन्निबन्धनोऽयं सकलव्यवहारः सर्वथैकस्वभावे त्वनिबन्धन इत्यत्याज्य एव, प्रत्यक्षादिज्ञानाभेदप्रसङ्गात्, सर्वथैकालम्बनत्वापत्तेः, निर्विषयत्वे चातिप्रसङ्गात्, सङ्ख्यादिनियमत्वानुपपत्तेरिति प्रपञ्चितमेतदन्यत्रेति नेह प्रयासः, अभिहितमेवार्थं पूर्वाचार्यबहुमतोऽयमिति तत्सङ्गृह्यार्याभिरुपप्रदर्शयन्नाह-'आह चे'त्यादि, आह च कस्मिन्-'नैगमे'त्यादि, नैगमशब्दार्थानामिति निगमा-जनपदा तत्र भवाः नैगमाः-शब्दा अर्थाश्च तेषामेकानेकार्थनयगमापेक्ष इति, एको-विशेषः एकत्वात् अनेकं-सामान्यमनेकाश्रितत्वात् तावेव अर्थावर्यमाणत्वात्, तथा नयगमः-परिच्छेदप्रकारः तमपेक्षते-अभ्युपैति यः स तथाविधः, अमुमेवार्थं पूर्वाचार्यवाचोयुक्त्याऽनुस्मारयन्नाह-'देशसमग्रग्राही'ति देशो-विशेषः समग्रं-सामान्यं तयोर्ग्राही-आश्रयति, 'व्यवहारी'ति व्यवहारोऽस्य सामान्यविशेषाभ्यां परस्परविमुखाभ्यामस्तीति व्यवहारी 'नैगमो ज्ञेयः' नैगमनयो ज्ञातव्य इति १॥ सङ्ग्रहार्यामाह-'यत् सङ्गृहीतवचन'मित्यादि, यदिति ज्ञानं सम्बध्यते, कीदृशं तदित्याह-'सङ्गृहीतवचनं' सङ्गृहीतं-सामान्यं तदेवोच्यत इति वचनं, ततश्च सङ्गृहीतं वचनं यस्य ज्ञानस्य तत् सङ्गृहीतवचनं, सामान्यज्ञानमित्यर्थः, एतच्च सामान्ये सत्तायां देशतः प्रक्रमात् गोत्वादेरेतद्देशात् विशेषाच्च खण्डादेः अपोह्येति शेषः, तद्व्यतिरेकेण तदभावात्, तदसत्त्वप्रसङ्गात्, एवंभूतं यद् ज्ञानं तत् सङ्ग्रहनयसंज्ञं-सङ्ग्रहनयनियतं विद्यात्-जानीयात् 'नयविधिज्ञो' नयभेदवित् २॥ व्यवहारार्यात्वियं-'समुदाये'त्यादि, समुदायः-संघातः, व्यक्तिः-मनुष्यत्वं, आकृतिः-संस्थानं, सत्ता-महासामान्यं संज्ञादयो-नामस्थापनाद्याः एषां निश्चयो-विशेषः तमपेक्षते-अभ्युपैति समुदायादिनां निश्चयापेक्षः, समुदायादीनां समुदायादिव्यतिरेकेणाभावात्, न समुदायादीनां समुदायः समुदायिभ्योऽन्यः, न च मनुष्यत्वं मनुष्यातिरिक्तं, न चाकृतिराकृतिमद्भ्यः, न सत्ता सद्भ्यः, न च नामादयो नम्यमाना-

दीन्यन्तरेण, विशेषप्रधानत्वात्, तदपेक्षं तं विद्यादिति सम्बन्धः, 'लोकोपचारनियत'मिति लोकोपचारनिषण्णः, लोकोपचारस्तु दह्यते गिरिर्गलति भाजनमित्यादि, 'व्यवहार'मिति नयं, विस्तृतमुपचरितार्थाश्रयणाद्विस्तीर्णं विद्यादित्यवबुध्येत ३॥ ऋजुसूत्रशब्दनयसङ्ग्रहमाह 'साम्प्रत'मित्यादिना, साम्प्रतविषयग्राहकं-वर्त्तमानज्ञेयपरिच्छेदकं ऋजुसूत्रनयं प्रकान्तमेव समासतः-सङ्क्षेपेण विद्यात्-जानीयाद्, यथार्थशब्दमित्यनेनैवंभूत एव प्रकाशितो लक्ष्यते, सर्वविशुद्धत्वादस्येति, दर्शितमेतत्, साम्प्रतसमभिरूढसङ्ग्रहार्थमाह-'विशेषितपदं त्वि'ति विशेषितं पदं-नामादि प्रसिद्धपूर्वकत्वादित्यादिना, 'शब्दनय'मिति ४॥ इतिशब्दो नयानुस्मरणनिष्ठासूचकः। अत्राह परः-'अथे'त्युपन्यासे, जीव इति शुद्धपदेनाकारिते-आदिष्ट इति योगः, तथा नोजीव इति देशसर्वप्रतिषेधे वा नियुक्ते, एवं 'अजीव' इति प्रतिषेधे वा नियुक्ते, एवं नोअजीव इति प्रतिषेधद्वयसमन्विते एवमाकारिते उच्चरिते सति केन नयेन नैगमादिना कोऽर्थः प्रतीयत इति, प्राग् घटपदार्थमजीवमेव केवलमधिकृत्यैव तदर्थप्ररूपणा कृतेति संशयबीजं परस्य, एवं पूर्वपक्षसम्भवे सूरिराह-'अत्रोच्यत' इत्यादि, जीव इत्याकारिते शुद्धपदेनादिष्टे किमित्याह-'नैगमे'त्यादि, नैगमश्च देशसङ्ग्रहश्च व्यवहारश्चेत्यादिः समासः, नैगमेन देशग्राहिणा तथा व्यवहारेण विशेषग्राहिणा ऋजुसूत्रेण वर्त्तमानग्राहिणा साम्प्रतेन समभिरुढेन च एभिः सर्वैरेव सङ्गृह्यैवंभूतवर्जैः पञ्चस्वपि गतिषु-नरकतिर्यङ्मनुष्यदेवसिद्धिगतिलक्षणेभ्यः अन्यतमो नारकादिगतिवर्त्ती जीव इत्येवं जीवः प्रतीयते, नाभावो नापि भावान्तरं, कस्मादिति चोदकाभिप्रायमाशङ्क्याह-एते हि यस्मान्नैगमादयो नया जीवं प्रति जीवमङ्गीकृत्य 'औपशमिकादियुक्तभावग्राहिणः' औपशमिकादियुक्तं भावं-अर्थं ग्रहीतुं शीला यतः, अतः सिद्धिगतावपि क्षायिकभावात् पञ्चग्रहणमिति ।

'नोजीव' इत्यादिना, नोजीव उच्चरिते अजीवद्रव्यं धर्मादि प्रतीयत इति वर्त्तते, जीवस्य वा देशप्रदेशौ, देशः शिरोऽङ्गादिविभागः, प्रदेशस्त्वविभजनीयः कश्चित्, नोशब्दस्य सर्वदेशप्रतिषेधवचनत्वादिति, 'अजीव' इत्यादि, अजीव इति वोच्चरिते अजीवद्रव्यमेव धर्म्मादि, प्रतीयत इति वर्त्तते, सर्वप्रतिषेधवाचकत्वादकारस्य, पर्युदासस्य चाश्रितत्वादिति, 'नोअजीव' इत्यादि, नोअजीव इति चादिष्टे जीव एव, नाभावो नापि भावान्तरं, प्रतीयत इति वर्त्तते, तस्य वाऽजीवस्य देशप्रदेशाविति पूर्ववत्, द्वयोरपि नोकाराकारयोः सर्वप्रतिषेधवाचकत्वात्, द्वौ प्रतिषेधौ प्रकृतं गमयत इतिकृत्वा ॥ एवमधिकृतनयवक्तव्यतामभिधाय एवंभूतवक्तव्यतामधिकृत्याह-'एवंभूते'त्यादि, एवंभूतनयेन तु जीव इत्याकारिते-उच्चरिते सति 'भवस्थ' इति भवे स्थितो भवस्थः-संसारी जीवः प्रतीयते, कस्मात् सिद्धिगतित्याग इत्याह-'एष हि' इत्यादि, एष यस्मान्नयः-एवंभूतः जीवं प्रत्येवं प्रवृत्तः-यदुत औदयिकादिभावग्राहक एव-औदयिकादिभावयुक्तं जीवमिच्छति, शब्दप्रवृत्तिनिमित्तापेक्षणात् यदाह-जीवतीति, जीव प्राणधारणे, प्राणानिन्द्रियादीन् धारयतीत्यर्थः, तच्च जीवनमिन्द्रियादिलक्षणं सिद्धे न विद्यते, तन्निबन्धनकर्म्माभावात्, तस्माद्भवस्थ एव जीव इत्येवंभूतनिगमनं ॥ 'नोजीव'इत्युच्चरिते अजीवद्रव्यं धर्म्मादि, प्रतीयत इति वर्त्तते, सिद्धो वा, तस्य प्राणलक्षणजीवलिङ्गानुपपत्तेः, नोशब्दस्य सर्वप्रतिषेधवाचकत्वात्, एतन्नयमतेन देशवाचकत्वासिद्धेः, देशिन एव देशत्वात्, भिन्नस्य तद्देशत्वायोगात्, सम्बन्धानुपपत्तेः, अनवस्थाप्रसङ्गादिति, 'अजीवे'त्यादि, अजीव इति उच्चरिते अजीवद्रव्यमेवाण्वादि, सर्वप्रतिषेधवाचक-त्वादकारस्य, 'नोअजीव' इत्याकारिते भवस्थ एव जीव इति प्रतीयते, प्रतिषेधद्वयस्य प्रकृतगमकत्वाद्, देशप्रदेशानभ्युपगमे कारणमाह-'समग्रार्थे'त्यादिना, समग्रः-सम्पूर्णः अर्थो-वस्तु समग्रार्थं ग्रहीतुं

शीलमस्येति विग्रहस्तद्भावः तस्मात्, अस्य नयस्यैवंभूतस्य नानेन एवंभूतनयेन देशप्रदेशौ-स्थूलसूक्ष्मावयवौ गृह्येते इति, एवमेकवचनेन चत्वारो विकल्पा दर्शिताः, एवं द्विवचनबहुवचनाभ्यामपि द्रष्टव्या इत्यभिधातुमाह-'एवं जीवौ जीवा' इति, द्वित्वबहुत्वाकारितेष्वपि चत्वारो विकल्पाः, तद्यथा-जीवौ नोजीवौ अजीवौ नोअजीवौ, बहुवचनेऽपि जीवाः नोजीवाः अजीवा नोअजीवा इति, एकवचनद्वित्वबहुत्वाकारितेष्वप्येवमेवाभ्युपगमो नैगमादीनामित्यर्थः, सर्वसङ्ग्रहमधिकृत्याह-'सर्वसङ्ग्रहे'त्यादि, सर्वसङ्ग्रहेण तु नयेन-सामान्यवस्तुग्राहिणा जीवो नोजीव इत्यादि एकवचनद्विवचनानां विकल्पा नेष्यन्ते, अस्य ह्येवंभूतं वस्तु शून्यं-प्रतिपत्त्यगोचरः, कस्मादित्याह-'एष ही'त्यादि, एष यस्मान्नयः सङ्ख्यानन्त्याज्जीवानां बहुत्वमेवेच्छतीति प्रतीयते, 'यथार्थग्राही'ति नैकवचनद्विवचनार्थः इह विद्यत इत्यभिप्रायः, चित्रमतश्चैष इत्येवमविरोधः, अयं विशेषोऽनेन प्रतिपन्नो देशसङ्ग्रहव्यवहारादिभ्य इति भावना पूर्ववत्, 'शेषास्त्वि'त्यादि, शेषास्तु नैगमादयो नयाः जात्यपेक्षमेकस्मिन्नेव जीवादौ बहुवचनमिच्छन्ति, कथमित्याह-'जात्यपेक्षं' जातिम्-सामान्यरूपामपेक्षते यत्तज्जात्यपेक्षं बहुवचनं, जातेरनेकाश्रयत्वात्, जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यां (पा० १-२-५८) बहुवचनात् बहुषु चैकवचनं जात्यपेक्षमेवेति, 'सर्वाकारितग्राहिण' इति सर्ववचनादिभिराकारितान्-उच्चारितान् अनेकान् विकल्पान् गृह्णन्ति तच्छीलाश्चेति सर्वाकारितग्राहिण इति एतन्मत-समाप्त्यर्थः, 'एव'मित्यादि, एवं सर्वभावेषु-धर्मास्तिकायादिषु नयवादेनानुगमः अनुसरणलक्षणः कार्यः इत्यतिदेश एषः । एवं प्रमेयनयानुगम उक्तः, साम्प्रतं प्रमाणमधिकृत्यैनमभिधातुं चोदकद्वारेणाह-'अत्राहे'त्यादि, 'अत्रे'त्युपन्यासार्थः पञ्चानां ज्ञानानां मत्यादीनां सविपर्ययाणां सह विपर्ययेण-अज्ञानस्वभावेन यानि वर्त्तन्ते तेषां कानि

मत्यादीनि को नयो नैगमादिः श्रयते अभ्युपगच्छतीति, अत्रोच्यते, 'नैगमे'त्यादि, नैगमादयस्तु य आद्या एव-नैगमसङ्ग्रहव्यवहाराः सर्वाणि मत्यादीनि श्रयन्ते, कानीत्याह-अष्टौ मतिज्ञानं मत्यज्ञानमित्यादिना प्रकारेण पञ्च ज्ञानानि त्रयो विपर्यया इतिकृत्वा श्रयन्ते-अभ्युपगच्छन्ति, यतः सर्वाण्येव तान्यर्थं परिच्छिन्दन्ति, 'ऋजुसूत्रनयो मतिमत्यज्ञान-विवर्ज्जितानि षट् श्रयत' इति, अत्राह परः-कस्मात् मतिमुक्तलक्षणां सविपर्ययां मत्यज्ञानसहितां न श्रयति-नेच्छति ?, अत्रोच्यते-श्रुतस्य-श्रुतज्ञानस्य सविपर्ययस्य श्रुताज्ञानसहितस्य उपग्रहत्वात् उपकारकत्वात्, मतिमत्यज्ञाने श्रुतस्य श्रुताज्ञानसहितस्य उपग्रहं कुरुते, तत्कार्यभूतत्वात् श्रुतस्य, फलप्रधानश्चैष नय इत्यभिप्रायः । शब्दनय पुनर्भावार्थावलम्बी द्वे एव, के ते इत्याह-श्रुतज्ञानकेवलज्ञाने श्रयते-अभ्युपैति, अत्राह-अथ कस्मान्नेतराणि-मत्यादीनि श्रयत इति, अत्रोच्यते-मत्यवधिमनःपर्यायाणां त्रयाणामपि, किमित्याह-श्रुतस्यैवोपग्रहत्वात्-उपकारकत्वादिति, नात्मान-मात्मना प्रतिपादयितुं क्षमाण्येतानि, मूककल्पत्वात्, श्रुतेन तु प्रतिपाद्यत इति श्रुतमुपकारकमेषां, उपकारि च श्रेयो जघन्यमुपकार्यमित्यधि-कृतनयाभिप्रायः, केवलज्ञानं तु प्रधानमन्येनानुपकार्यं स्वसामर्थ्येनैव च प्रवर्त्तितवाग्योगमिति श्रयते, विपर्ययानाश्रयणे तु कारणमाह-'चेतने'त्यादि, चेतना-जीवत्वं परिच्छेदत्वसामान्यं गृह्यते ज्ञ इत्यनेन तु विशेषपरिच्छेदिता, तयोश्चेतनाज्ञयोः स्वाभाव्यं-तथाभवनं तस्माच्च चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां-पृथिवीकायिकादीनां नास्य नयस्य कश्चिन्मिथ्यादृष्टिरज्ञो वैकान्तेन जीवो विद्यते, यथावस्थितस्पर्शादि-परिच्छेदात्, आगमोऽपि किलैवमेव व्यवस्थितः 'सव्वजीवाणंपि अ णं अक्खरस्स अणंतभागो णिच्चुग्घाडिओ'त्ति (नन्दीसूत्र)वचनात् सर्वे सम्यग्दृष्टयो ज्ञानिनश्च, तस्मादपि कारणात्, न केवलं श्रुतोपग्रहत्वेन, विपर्ययान्-मत्यादीन् न श्रयत इति नाभ्युपैति अतश्च-अस्मात्

कारणात् प्रत्यक्षानुमानोपमानाप्तवचनानामपि च प्रागभिहितस्वरूपाणां प्रामाण्यमभ्यनुज्ञातमि(वंत इ)ति, एतेन यत् 'प्रत्यक्षमन्यदि'त्यस्मिन् सूत्रे प्रतिज्ञातं नयवादान्तरेण तु यथा मतिश्रुतविकल्पजानि भवन्ति तथा परस्ताद्वक्ष्यामः इति तदुक्तं वेदितव्यं, एवं हि सम्यग्दृष्टित्वात् सम्यग्ज्ञानित्वाच्च सर्वजीवानां सर्वज्ञानानामेव प्रामाण्यं, प्रतिभास-कत्वादिति ॥ साम्प्रतं प्रमाणनयविचारसमनन्तराध्यायार्थमुपसंहरन्नशङ्कार्थं वास्य पूर्वसूरिबहुमतत्वं कारिकाभिरुपदर्शयन्नाह 'आह चे'त्यादि, आह च कश्चित् पूर्वसूरिः 'विज्ञाये'त्यादि, विज्ञाय एकार्थानि पदानि-पर्यायशब्दरूपाणि तद्यथा-जीवः प्राणी जन्तुः इत्यादीनि च, अर्थपदानि च-निरुक्तपदानि, जीवतीति जीवः, प्राणा अस्य विद्यन्त इति प्राणी, जायत इति जन्तुरित्येवमादीनि, विधानं नामस्थापनादिकं इष्टं च निर्देशस्वामित्वादि चशब्दादन्यच्च तन्त्रयुक्त्यादि, तथाऽऽद्यं परोक्षस्य प्रामाण्यस्यादावभिधानं तत्पूर्वकमेव प्रत्यक्षमिति ज्ञापनार्थमित्यादि, विन्यस्य नामादिभिः परिक्षेपात्-समन्तात् नयैः नैगमादिभिः परीक्ष्याणि-मीमांस्यानि तत्त्वानि-जीवादीनि ॥१॥ ज्ञानं-मत्यादि सविपर्यासं-सह विपर्यासैः त्रिभिः त्रयः श्रयन्तीति त्रयो-नैगमादयः अभ्युपगच्छन्ति, आदितः आदेरारभ्य नयाः सर्वमष्टविधं ज्ञानं विभङ्गान्तं, एतच्च सामान्यतः सम्यग्दृष्टेः-उक्तलक्षणस्य ज्ञानं मिथ्यादृष्टेर्विपर्यासः मिथ्यात्वग्रहावेशादिति ॥२॥ 'ऋजुसूत्र' इत्यादि, ऋजुसूत्रो नयः षण् मतिमत्यज्ञानरहितानि श्रुतादीनि श्रयते, मतिं सविपर्ययां श्रुतोपग्रहात् श्रुतोपकारकत्वात् अनन्यत्वात्-श्रुतानन्यत्वेन न श्रयत इति, श्रुतकेवले तु-श्रुतज्ञानकेवलज्ञाने तु पुनः शब्दः श्रयते उक्तनीत्या, अत एवाह-नान्यत् मत्यादि श्रयते, श्रुताङ्गत्वात्, श्रुतस्यैव तत्प्रतिविशिष्टबलाधान-हेतुत्वादिति ॥३॥ 'मिथ्यादृष्टी'त्यादि, मिथ्यादृष्ट्यज्ञाने प्राक् प्रदर्शिते न श्रयते, कस्मादित्याह-नास्य शब्दनयस्य कश्चिदज्ञोऽस्ति, कुत इत्याह-

'ज्ञस्वाभाव्यादि'ति पूर्ववत्, जीवः-आत्मा, मिथ्यादृष्टिर्न चाप्यज्ञोऽस्ति जीव एव इत्यादि ॥३॥ 'इति नयवादाश्चित्रा' नैगमादिभेदेन क्वचिद्-वस्त्वंशे स्वरुचिगृहीते विरुद्धा इव लक्ष्यन्ते, विशेषे कथं सामान्यं ? सामान्ये वा विशेष ?, इत्यादि, अथ च विशुद्धा एते, विशेषस्य सामान्याननुविद्धस्यासत्त्वात् सामान्यस्य विशेषाननुविद्धस्येति प्रपञ्चित-मेतदन्यत्र, एते च 'लौकिकविषयातीता' इति लौकिकानां-वैशेषिकादीनां विषयाः-शास्त्राणि तान्यतीताः-अतिक्रान्ताः अवधृतस्वरूपत्वेन तदसम्भवात्, एते च तत्त्वज्ञानार्थं सद्भूतसर्वदोषरहितज्ञानाय अधि-गम्या-ज्ञेयाः, दर्शनज्ञानार्थमित्यर्थः ॥१-३५॥

इति हरिभद्रसूरि विरचितायां तत्त्वार्थवृत्तिटीकायां डुपडुपिकाभिधानायां तत्त्वार्थाटीकायां प्रथमोऽध्यायः समाप्तः ॥

નૈગમનયના બે ભેદ

ટીકાર્થ– આદિમાં થનાર આદ્ય કહેવાય. જે કહે તે શબ્દ. આદ્ય અને શબ્દ એ બે નયોના અનુક્રમે બે અને ત્રણ ભેદ છે. આ પ્રમાણે સૂત્રનો સમુદિત અર્થ છે. અવયવાર્થને ભાષ્યકાર "आद्य" इत्यादि, ગ્રંથથી કહે છે- આદ્ય એવા પદથી પૂર્વોક્ત નૈગમ-સંગ્રહ ઇત્યાદિ સૂત્રમાં કહેલાં ક્રમના અનુસારથી નૈગમનયને કહે છે, અર્થાત્ આદ્ય એટલે નૈગમનય. નૈગમનયના બે ભેદ છે. બે ભેદને કહે છે- દેશપરિક્ષેપી અને સર્વપરિક્ષેપી. દેશ એટલે પરમાણુ આદિમાં રહેલ વિશેષ. વિશેષમાં ફેલાઇ જવાનો જેનો સ્વભાવ છે તે દેશપરિક્ષેપી, અર્થાત્ વિશેષને જાણવાના સ્વભાવવાળો. સર્વ એટલે સામાન્ય. સામાન્યમાં ફેલાનારો હોવાથી સામાન્યમાં ફેલાઇ જવાનો જેનો સ્વભાવ છે તે સર્વપરિક્ષેપી, અર્થાત્ સામાન્યગ્રાહી= સામાન્યને જાણવાના સ્વભાવવાળો. બે ચ શબ્દ દેશપરિક્ષેપી અને સર્વપરિક્ષેપી એ બંનેની અલગ અલગ સ્વતંત્રતાને જણાવનારા છે.

શબ્દનયના ત્રણ ભેદ

શબ્દનયના ત્રણ ભેદ છે. ત્રણ ભેદોને "साम्प्रत" इत्यादिથી ભાષ્યકાર કહે છે- (સામ્પ્રત એટલે વર્તમાનકાળ.) સામ્પ્રતકાળની વસ્તુનો આશ્રય

(=સ્વીકાર) કરવાથી સામ્પ્રત કહેવાય છે. (પર્યાયવાચી શબ્દોના) વિવિધ અર્થોને ગ્રહણ કરવાથી સમભિરૂઢ કહેવાય છે. જે શબ્દનો જે અન્વર્થ છે તે યથાભૂત અન્વર્થનો ગ્રાહક નય સમભિરૂઢ નય છે. કેમકે આ નય અન્વર્થની પ્રધાનતાવાળો છે. इति શબ્દ સમુચ્ચય અર્થમાં કે પરિસમાપ્તિના અર્થમાં છે.

નૈગમનયનું સ્વરૂપ

"अत्राह" ઇત્યાદિ, આ અધિકારમાં અન્ય પ્રશ્ન કરે છે કે, આ નૈગમાદિ નયોનું લક્ષણ શું છે ? પ્રશ્નનો ઉત્તર કહેવાની ઇચ્છાથી કહે છે- "अत्रोच्यते निगमेषु" ઇત્યાદિ, નૈગમ-નિશ્ચયથી જણાય છે, ઉચ્ચારાય છે, પ્રયોજાય છે શબ્દો જેમાં તે નિગમ. નિગમ એટલે દેશ. નિગમોમાં=દેશોમાં કહેલા=ઉચ્ચારેલા જે ઘટાદિ શબ્દો અને ઉચ્ચારેલા ઘટાદિ શબ્દોના જલ આનયનાદિ કાર્ય કરવામાં સમર્થ એવા ઘટાદિ અર્થો(=પદાર્થો)નું પરિજ્ઞાન એ વાચ્ય-વાચક ભાવથી શબ્દાર્થનું પરિજ્ઞાન, અર્થાત્ આ શબ્દનો આ અર્થ છે, અને આ અર્થ માટે આ શબ્દનો પ્રયોગ કરાય છે એ રીતે વાચ્ય-વાચક ભાવથી શબ્દાર્થનું જે પરિજ્ઞાન[1] તે દેશ-સમગ્રગ્રાહી નૈગમનય છે. અંશ રૂપ હોવાથી જ દેશ એટલે વિશેષ. સંપૂર્ણમાં વ્યાપ્ત(=ફેલાયેલ) હોવાથી સમગ્ર એટલે સામાન્ય. નૈગમનય વિશેષ અને સામાન્યને ગ્રહણ કરે છે. સુવર્ણનો ઘટ છે એવું કથન દેશગ્રાહી નૈગમનયથી છે. ઘટ એવું કથન સમગ્રગ્રાહી નૈગમનયથી છે. અહીં સામાન્ય અને વિશેષ એ ઉભયનો સ્વીકાર હોવા છતાં નય જ છે. કેમકે સ્વવિષયની પ્રધાનતા છે, અર્થાત્ દેશગ્રાહી નૈગમનયમાં વિશેષની પ્રધાનતા છે અને સમગ્રગ્રાહી નૈગમનયમાં સામાન્યની પ્રધાનતા છે.

[૧. નૈગમનય[2]— આ નયની અનેક દૃષ્ટિઓ છે. ગમ એટલે દૃષ્ટિ-જ્ઞાન. જેની અનેક દૃષ્ટિઓ છે તે નૈગમ. વ્યવહારમાં થતી લોકરૂઢિ આ

૧. "सोऽयमित्थंप्रपञ्चः" આ પદોનો અર્થ લખવામાં વાક્ય રચના ક્લિષ્ટ બને, એથી અનુવાદમાં તેનો અર્થ કર્યો નથી. તેનો અર્થ આ પ્રમાણે છે- જે આ વિસ્તાર છે, અર્થાત્ ઘટાદિ શબ્દો. ઘટાદિ શબ્દોના અર્થો એમ શબ્દાર્થ પરિજ્ઞાન એ બધુ દેશ-સમગ્રગ્રાહી નૈગમનય છે.

૨. કાંઉસવાળું આ લખાણ, હવે પછી પણ આવનારું કાંઉસનું નયસંબંધી લખાણ "તત્ત્વાર્થાધિગમસૂત્ર"ના મારા (આ. રાજશેખરસૂરિ) કરેલા વિવેચનમાંથી અહીં લીધું છે.

નૈગમનયની દૃષ્ટિથી છે. આ નયના મુખ્ય ત્રણ ભેદો છે- (૧) સંકલ્પ, (૨) અંશ અને (૩) ઉપચાર.

(૧) **સંકલ્પ–** સંકલ્પને સિદ્ધ કરવા જે કોઈ અન્ય પ્રવૃત્તિ કરવામાં આવે છે તેને પણ સંકલ્પની જ પ્રવૃત્તિ કહેવામાં આવે છે. જેમ કે- રમણલાલે મુંબઈ જવાનો સંકલ્પ=નિર્ણય કર્યો. આથી તે પોતાને જરૂરી કપડાં આદિ સામગ્રી પોતાની પેટીમાં ભરવા લાગ્યો. આ વખતે તેનો મિત્ર ચંપકલાલ ત્યાં આવ્યો. તેણે રમણલાલને ક્યાંક જવા માટેની તૈયારી કરતો જોઈ પૂછ્યું: 'તમે ક્યાં જાવ છો ?' રમણલાલે કહ્યું: 'હું મુંબઈ જાઉં છું.' અહીં મુંબઈ જવાની ક્રિયા તો હજી હવે થવાની છે. હમણાં તો માત્ર તેની તૈયારી થઈ રહી છે. છતાં મિત્રે વર્તમાનકાળનો ગમન ક્રિયાનો પ્રશ્ન કર્યો અને રમણલાલે જવાબ પણ વર્તમાનકાળમાં આપ્યો. વર્તમાનકાળમાં મુંબઈ તરફ ગમન ન હોવા છતાં વર્તમાનકાળનો પ્રશ્ન અને જવાબ સંકલ્પરૂપ નૈગમનયની દૃષ્ટિથી સત્ય છે. આ નય કહે છે કે જ્યારથી સંકલ્પ કર્યો ત્યારથી તે સંકલ્પ પૂર્ણ ન થાય ત્યાં સુધી તે માટેની સઘળી ક્રિયાઓ સંકલ્પની જ કહેવાય. એટલે મુંબઈ જવાની તૈયારી પણ મુંબઈના ગમનની ક્રિયા છે.

(૨) **અંશ–** અંશનો પૂર્ણમાં ઉપચાર. મકાનનો ભીંત આદિ કોઈ એક ભાગ=અંશ પડી જતાં આપણે 'મકાન પડી ગયું' એમ કહીએ છીએ. આંગળીનો એક ભાગ પાક્યો હોવા છતાં 'આંગળી પાકી' એમ કહેવામાં આવે છે. પુસ્તકનું એકાદ પાનું ફાટી જતાં 'પુસ્તક ફાટી ગયું' એમ કહેવાય છે. આ સઘળો વ્યવહાર અંશનૈગમની દૃષ્ટિથી ચાલે છે.

(૩) **ઉપચાર–** ભૂતકાળનો વર્તમાનમાં, ભવિષ્યકાળનો વર્તમાનમાં, કારણનો કાર્યમાં, આધેયનો આધારમાં એમ અનેક રીતે ઉપચાર કરવામાં આવે છે. જ્યારે દિવાળી આવે છે ત્યારે આપણે "આજે દિવાળીના દિવસે ભગવાન મહાવીર નિર્વાણ પામ્યા" એમ કહીએ છીએ. ભગવાન મહાવીર નિર્વાણ પામ્યા તેને ૨૫૦૦ વર્ષ ઉપરાંત કાલ થઈ ગયો. છતાં

આપણે ભૂતકાળનો વર્તમાનકાળમાં આરોપ કરીને 'આજે ભગવાન મહાવીર નિર્વાણ પામ્યા" એમ બોલીએ છીએ. ઘી જીવન છે એમ બોલાય છે. ઘી જીવન થોડું છે ? ઘી તો જીવવાનું સાધન છે=કારણ છે. કારણમાં કાર્યનો ઉપચાર કરીને 'ઘી જીવન છે' એમ કહેવામાં આવે છે. નગરના લોકો રડી રહ્યા હોવા છતાં 'નગર રડે છે' એમ બોલવામાં આવે છે. અહીં આધેય લોકોનો આધારરૂપ નગરમાં ઉપચાર કરવામાં આવ્યો છે. પર્વત ઉપર રહેલું ઘાસ બળવા છતાં 'પર્વત બળે છે' એમ કહેવામાં આવે છે. સિંહ સમાન બળવાળા માણસને 'આ તો સિંહ છે' એમ સિંહ તરીકે સંબોધવામાં આવે છે. કેટલીકવાર આપણે વર્તમાનકાળમાં ભૂતકાળનો આરોપ કરીએ છીએ. જેમકે દૂધપાક તૈયાર થઇ રહ્યો છે તે વખતે કોઇ પૂછે કે- 'આજે શું બનાવ્યું છે ?' તો 'આજે દૂધપાક બનાવ્યો છે' એમ કહેવામાં આવે છે. અહીં દૂધપાક હજી હવે બનવાનો છે, બની રહ્યો છે, છતાં 'બનાવ્યો' એમ ભૂતકાળનો પ્રયોગ કરવામાં આવે છે. એ પ્રમાણે કેટલીક વાર ભવિષ્યકાળનો વર્તમાનમાં આરોપ કરીએ છીએ. કોઇ કાર્ય માટે બહાર જવાને જરા વાર હોવા છતાં 'ક્યારે જવાના છો ?' એમ પૂછવામાં આવે તો 'હમણાં જ જઉં છું' એમ કહેવામાં આવે છે. અહીં જવાની ક્રિયા તો ભવિષ્યકાળમાં=થોડીવાર પછી થવાની છે, એથી 'હમણાં જ જઇશ' એમ કહેવું જોઇએ તેના બદલે 'હમણાં જ જઉં છું' એમ વર્તમાનકાળનો પ્રયોગ કરવામાં આવે છે.

આમ અનેક પ્રકારની વ્યવહારરૂઢિ=લોકરૂઢિ આ નૈગમનયની દૃષ્ટિથી છે.

હવે બીજી રીતે નૈગમનયને વિચારીએ.

નૈગમનયના સર્વપરિક્ષેપી અને દેશપરિક્ષેપી એમ બે ભેદ છે. સર્વપરિક્ષેપી એટલે સામાન્યગ્રાહી અને દેશપરિક્ષેપી એટલે વિશેષગ્રાહી. *પ્રત્યેક વસ્તુ સામાન્ય અને વિશેષ એમ ઉભયસ્વરૂપ છે.* જેમકે ઘટ. માટીની દૃષ્ટિએ ઘટવિશેષ છે, કારણ કે માટીની અનેક વસ્તુઓ બને છે. માટીની દરેક વસ્તુમાં માટી રહેલી છે. માટે માટી સામાન્ય છે અને

તેમાંથી બનેલી દરેક વસ્તુ વિશેષ છે. આથી માટીની અપેક્ષાએ ઘટ વિશેષ રૂપ છે. ઘટના પણ અનેક પ્રકારો હોય છે. જુદા જુદા પ્રકારના ઘટની અપેક્ષાએ ઘટ એ સામાન્ય છે અને જુદા જુદા પ્રકારના ઘટ વિશેષ છે. આમ દરેક વસ્તુ અપેક્ષાભેદથી સામાન્ય-વિશેષ સ્વરૂપ છે.

નૈગમનય સામાન્ય-વિશેષ ઉભયને અવલંબે છે. પણ તેનો આધાર લોકરૂઢિ છે. નૈગમનય લોકરૂઢિ પ્રમાણે ક્યારેક સામાન્યને અવલંબે છે તો ક્યારેક વિશેષને અવલંબે છે. જેમકે, ભારતમાં અમદાવાદની અમુક પોળમાં અમુક નંબરના ઘરમાં રહેતા ચંદ્રકાંતને જ્યારે જ્યારે અન્ય અજાણ વ્યક્તિ 'તમે ક્યાં રહો છો ?' એ પ્રશ્ન પૂછે છે ત્યારે ત્યારે તે એક સરખો ઉત્તર નથી આપતો, કિન્તુ ભિન્ન ભિન્ન ઉત્તર આપે છે. જ્યારે તે અમેરિકામાં હોય ત્યારે જો કોઇ તેને 'તમે ક્યાં રહો છો ?' એમ પૂછે તો તે કહે કે 'હું ભારતમાં રહું છું.' જ્યારે તે ભારતમાં મહારાષ્ટ્ર આદિ દેશમાં હોય ત્યારે તે 'હું ગુજરાતમાં રહું છું' એમ ઉત્તર આપે છે. ક્યારેક તે 'અમદાવાદમાં રહું છું' એમ ઉત્તર આપે છે. ક્યારેક 'અમુક પોળમાં અમુક નંબરના ઘરમાં રહું છું' એમ ઉત્તર આપે છે. અહીં પ્રશ્ન એક જ છે. તેના જવાબો અનેક છે. દરેક જવાબ સત્ય છે એમ નૈગમનય કહે છે. અહીં અમેરિકા, રશિયા વગેરે દેશોની અપેક્ષાએ ભારત વિશેષ છે. પણ ભારતના ગુજરાત, મહારાષ્ટ્ર આદિ ભાગોની અપેક્ષાએ ભારત સામાન્ય છે. ભારતની અપેક્ષાએ ગુજરાત વિશેષ છે, પણ ગુજરાતના કચ્છ-કાઠિયાવાડ વગેરે ભાગોની અપેક્ષાએ ગુજરાત સામાન્ય છે. નૈગમનય સામાન્ય-વિશેષ ઉભયને ગ્રહણ કરે છે.]

संग्रहनयनुं स्वरूप

संग्रह– ''अर्थानाम्' ઇત્યાદિથી સંગ્રહના લક્ષણને કહે છે- ઘટાદિ પદાર્થોના સર્વ સ્વરૂપનો અને એક દેશ સ્વરૂપનો એક રૂપે સંગ્રહ કરવો તે સંગ્રહ. સર્વ એટલે સામાન્ય. કારણ કે સામાન્ય સર્વમાં વ્યાપ્ત છે. દેશ એટલે વિશેષ. કારણ કે વિશેષ અંશ સ્વરૂપ જ છે. સામાન્ય-વિશેષ સ્વરૂપનો એક રૂપે સંગ્રહ કરવો તે સંગ્રહ. કારણ કે બધા પદાર્થો સત્ માત્ર

છે, સત્ માત્રથી ભિન્ન નથી. કેમકે સત્થી અતિરિક્ત વસ્તુનો અભાવ છે. નૈગમનયને અભિમત સામાન્યરૂપ અને વિશેષરૂપ એ બધા પદાર્થો સત્ છે એમ સત્ રૂપે બધા પદાર્થોનો સંગ્રહ કરે એ સંગ્રહનય છે.

[૨. **સંગ્રહનય**– જે નય સર્વ વિશેષોનો એક રૂપે=સામાન્યરૂપે સંગ્રહ કરી લે તે સંગ્રહનય. દરેક વસ્તુ અપેક્ષાભેદથી સામાન્ય અને વિશેષ એમ ઉભયરૂપે છે, એમ આપણે જોયું. આથી દરેક વસ્તુમાં સામાન્ય અંશ અને વિશેષ અંશ રહેલ છે. સંગ્રહનય સામાન્ય અંશને ગ્રહણ કરે છે. તે કહે છે કે સામાન્ય વિના વિશેષ હોઈ શકે જ નહિ. સામાન્ય વિના વિશેષ આકાશ કુસુમવત્ અસત્ જ છે. વનસ્પતિ વિના લીમડો હોઈ શકે જ નહિ. આથી જ્યાં જ્યાં વિશેષ છે ત્યાં ત્યાં સામાન્ય અવશ્ય હોય છે. આથી સંગ્રહનય દરેક વસ્તુની ઓળખાણ સામાન્યરૂપે આપે છે. એની દૃષ્ટિ સામાન્ય તરફ જ જાય છે.

આથી આ નયની દૃષ્ટિ વિશાળ છે. તે સર્વ વિશેષોનો સામાન્યથી એકરૂપે સંગ્રહ કરી લે છે. જેમકે ચેતન અને જડ એ બંને પદાર્થો જુદા છે. પણ આ નય તે બંનેને એકરૂપે સંગ્રહી લે છે. જડ અને ચેતન એ બંને પદાર્થો સત્ છે. સત્ તરીકે બંને સમાન છે=એક છે. પ્રત્યેક જીવ ભિન્ન ભિન્ન હોવા છતાં આ નય સર્વ જીવોને ચૈતન્યથી એકરૂપે માને છે. કારણ કે દરેકમાં ચૈતન્ય સમાન=એક છે. સાડી, બુશકોટ, બ્લાઉઝ, ધોતિયું વગેરે અનેક પ્રકારની વસ્તુને કાપડ કહીને એકરૂપ માને છે. આમ આ નય સામાન્ય અંશને ગ્રહણ કરે છે. સામાન્ય અંશમાં અનેક તરતમતા હોય છે. આથી સંગ્રહનયના દરેક દૃષ્ટાંતમાં પણ તરતમતા રહેવાની. સામાન્ય અંશ જેટલો વિશાળ તેટલો સંગ્રહનય વિશાળ. સામાન્ય અંશ જેટલો સંક્ષિપ્ત તેટલો સંગ્રહનય સંક્ષિપ્ત.]

વ્યવહારનયનું સ્વરૂપ

વ્યવહાર– વ્યવહારના લક્ષણને કહેવાની ઇચ્છાથી ભાષ્યકાર કહે છે– "લૌકિક" ઇત્યાદિ, વ્યવહાર લૌકિક સમાન છે, ઉપચારની બહુલતાવાળો છે અને વિસ્તૃત અર્થવાળો છે.

લૌકિક સમાન– મનુષ્યાદિ રૂપ લોકમાં જે પ્રસિદ્ધ છે તે લૌકિક વ્યવહાર. વ્યવહાર લૌકિક પુરુષોની સમાન=તુલ્ય છે. જેમ લૌકિક પુરુષો વિશેષનો વ્યવહાર કરે છે તેમ વ્યવહારનય પણ વિશેષનો વ્યવહાર કરે છે. (જેમકે, શાક સામાન્ય છે, દૂધી, પરવળ, ગુવાર વગેરે વિશેષ છે. શાક લાવવાનું હોય ત્યારે શેઠ નોકરને શાક લઈ આવ એમ ન કહે, કિંતુ દૂધીનું શાક, પરવળનું શાક, ગુવારનું શાક લઈ આવ એમ કહે. આમ લોકમાં વિશેષનો વ્યવહાર થાય છે. માટે આ વ્યવહારનય પણ વિશેષનો વ્યવહાર કરે છે.)

ઉપચારની બહુલતાવાળો– અન્ય સ્થાને રહેલા અર્થનો અન્ય સ્થાને અધ્યારોપ[૧] કરવો તે ઉપચાર. જેમકે, કુંડિકા ઝરે છે=ગળે છે, માર્ગ જાય છે. અહીં પરમાર્થથી તો કુંડીમાં રહેલું પાણી ઝરે છે, માર્ગમાં રહેલા પુરુષો જાય છે, આમ છતાં ઉપચારથી કુંડિકા ઝરે છે, માર્ગ જાય છે એવો વ્યવહાર થાય છે.

વિસ્તૃત અર્થવાળો– વ્યવહારનય ઉપચારની બહુલતાવાળો હોવાથી જ વિસ્તીર્ણ અધ્યવસાયવાળો છે, અર્થાત્ એના જ્ઞેય વિષય અનેક હોવાના કારણે વ્યવહારનય વિસ્તૃત અર્થવાળો છે.[૨]

[**૩. વ્યવહારનય–** જે નય વિશેષ તરફ દૃષ્ટિ કરીને દરેક વસ્તુને જુદી જુદી માને તે વ્યવહારનય. આ નય કહે છે કે વિશેષ સામાન્યથી જુદું નથી એ વાત સાચી, પણ વિશેષ વિના વ્યવહાર ન ચાલી શકે. શું 'વનસ્પતિ લાવ' એટલું કહેવા માત્રથી લાવનાર વ્યક્તિ કંઈ લાવી શકશે ? નહિ જ. અહીં તમારે કહેવું જ પડશે કે 'અમુક વનસ્પતિ લાવ.' આમ કહેવાથી તે જોઈતી વસ્તુ લાવી શકે છે. વિશેષને માન્યા સિવાય વ્યવહાર ચાલે જ નહિ. આથી વ્યવહારનય વિશેષ અંશને માને છે.

૧. અધ્યારોપ=એક વસ્તુના ગુણને બીજી વસ્તુમાં જોડવો. અધ્યારોપ અને આરોપ એ બંને શબ્દોનો એક જ અર્થ છે.

૨. विस्तृतो=विस्तीर्णोऽनेकोऽर्थो ज्ञेयो यस्य स विस्तृतार्थः अध्यवसायविशेषो व्यवहार इति निगद्यते। (સિદ્ધસેન ગણિકૃત ટીકા)

અહીં સુધી આપણે જોઈ ગયા કે નૈગમ, સંગ્રહ અને વ્યવહાર એ ત્રણ નયોમાં નૈગમનય સામાન્ય અને વિશેષ એમ ઉભયને સ્વીકારે છે. સંગ્રહનય કેવળ સામાન્યને સ્વીકારે છે. વ્યવહારનય કેવળ વિશેષને સ્વીકારે છે. સંગ્રહ અને વ્યવહારનય પરસ્પર સાપેક્ષ છે. આથી એક જ વિચાર સંગ્રહનયનો પણ હોય અને વ્યવહારનયનો પણ હોય. જેમકે 'આ નગરમાં મનુષ્યો રહે છે' આ વિચાર સંગ્રહનયનો પણ છે અને વ્યવહારનયનો પણ છે. નગરમાં મનુષ્ય ઉપરાંત જાનવર પ્રાણીઓ પણ રહે છે. આથી જાનવર અને મનુષ્ય એ બંને જીવ છે. જીવની દૃષ્ટિએ મનુષ્ય વિશેષ છે. આથી જીવની દૃષ્ટિએ 'આ નગરમાં મનુષ્યો રહે છે' એ વિચાર વ્યવહારનયથી છે. મનુષ્યોમાં સ્ત્રી, પુરુષ, બાળક, યુવાન, વૃદ્ધ વગેરે હોય છે. મનુષ્યના સ્ત્રી, પુરુષ આદિ વિશેષ ભેદોની અપેક્ષાએ 'આ નગરમાં મનુષ્યો રહે છે' એ વિચાર સંગ્રહનય છે. આ પ્રમાણે એક જ વિચાર સંગ્રહનય પણ કહેવાય અને વ્યવહારનય પણ કહેવાય.

આથી તાત્પર્ય એ આવ્યું કે- જેટલા અંશે સામાન્ય તરફ દૃષ્ટિ તેટલા અંશે સંગ્રહનય અને જેટલા અંશે વિશેષ તરફ દૃષ્ટિ તેટલા અંશે વ્યવહારનય.]

ઋતુસૂત્રનયનું સ્વરૂપ

ઋજુસૂત્ર– ઋજુસૂત્રનું લક્ષણ આ પ્રમાણે છે- "सताम्" ઇત્યાદિ, વિદ્યમાન વર્તમાનકાલીન ઘટાદિ પદાર્થોના જે શબ્દ અને જ્ઞાન તે ઋજુસૂત્ર છે.

અહીં વિદ્યમાન એમ કહેવા દ્વારા આકાશપુષ્પ આદિ જેવા અસત્ વસ્તુનો નિષેધ કર્યો. વર્તમાનકાલીન એમ કહેવા દ્વારા ભૂતકાળની અને ભવિષ્યકાળની વસ્તુનો નિષેધ કર્યો. ઘટાદિ પદાર્થોનો એમ કહેવા દ્વારા જે પદાર્થ નથી=કલ્પિત છે તેવી વસ્તુનો નિષેધ કર્યો.

